श्रेष्ठि देवचन्द्र–लालभाई जैनपुस्तकोद्धारे ग्रन्थाङ्कः ८६.

श्रीमहोपाध्यायकीर्तिविजयगणिशिष्य–महोपाध्याय–श्रीविनयविजयगण्युपज्ञः

श्रीलोकप्रकाशः।

(चतुर्थविभागे सप्तत्रिंशत्तमसर्गान्तः काल-भाव-लोकप्रकाशः सप्रशस्तिकः सम्पूर्णः)

मुद्रणकारिका—श्रेष्ठि-देवचन्द्र-लालभाई-जैनपुस्तकोद्धारसंस्था ।

प्रसिद्धिकारकः—जीवनचन्द्र–साकरचन्द्र–जह्वेरी, अस्याः कार्यवाहकः ।

इदं पुस्तकं मोहमय्यां जीवनचन्द–साकरचन्द जह्वेरी इत्यनेन

"निर्णयसागरयन्त्रणालये" कोलभाटवीथ्यां २६–२८ तमे मन्दिरे रामचन्द्र येसू शेडगेद्वारा मुद्रयित्वा प्रकाशितम् ।

वीरसम्वत् २४६३ — विक्रमसंवत् १९९३ — खिस्ताब्दः १९३७

प्रथमसंस्करणम्] — पण्यम् रू. १. — [प्रतयः १०००

Sheth Devchand Lālbhāī Jain Pustakoddhār Fund Series: No. 86.

ŚRĪ LOKAPRAKĀŚA

Part IV

BY

ŚRĪ VINAYAVIJAYA GAṆI

COMPOSED IN

Vikrama Era 1708.

Copies 1000]

Price Rs. 1-0-0

[A. D. 1937

PARTS OF ŚRĪ LOKAPRAKĀŚA

Serial No.	Parts	Sargas (Chapters)	Subject
65	I	I-XI	Dravya Loka prakās'a.
74	II	XII-XXVII	Kshetra „ „
78	III	XXVIII-XXXIII	A part of Kāla „ „
86	IV	XXXIV-XXXVII	Kāla & Bhāva „ „

श्रेष्ठी देवचन्द लालभाई जव्हेरी.

जन्म १९०९ वैक्रमाब्दे कार्तिकशुक्लैकादश्याम् (देवदीपावली—सोमवासरे) सूर्यपूरे.	निर्याणम् १९६२ वैक्रमाब्दे पौपकृष्णतृतीयायाम् (मकरसङ्क्रान्तिमन्दवासरे) मुम्बय्याम्.

The Late Sheth Devchand Lalbhai Javeri.

Born 22nd Nov. 1852 A. D. Surat, Died 13th January 1906 A. D. Bombay.

1-37 –Copies 3000

N S P.

सैद्धान्तिकतार्किकवैयाकरणचक्रवर्तिनः

पुण्यसरणाः

समस्तमुनिमण्डलागमवाचनादातार

आगमोद्धारका

आचार्यवर्य्य १००८

श्रीमदानन्दसागरसूरीश्वरपादाः ।

महोपाध्याय-श्रीविनयविजयगणि-विरचित—

श्रीलोकप्रकाशस्य

ग्रन्थाङ्क

६५ **प्रथमविभागे**—एकत एकादशसर्गान्तो द्रव्यलोकप्रकाशः सम्पूर्णः ।

७४ **द्वितीयविभागे**—द्वादशतः सप्तविंशतिसर्गान्तः क्षेत्रलोकप्रकाशः सम्पूर्णः ।

७८ **तृतीयविभागे**—अष्टाविंशतितमतः त्रयस्त्रिंशत्तमसर्गान्तः काललोकप्रकाशः अपूर्णः ।

८६ **अस्मिँश्चतुर्थविभागे**—चतुस्त्रिंशत्तमात् पञ्चत्रिंशत्तमसर्गान्तः काललोकप्रकाशः सम्पूर्णः, षट्त्रिंशत्तमे सर्गे समग्रो भावलोकप्रकाशः, सप्तत्रिंशत्तमे च सर्गाणां बीजकं ग्रन्थकृत्प्रशस्तिश्च । ग्रन्थः सम्पूर्णः ।

विद्वद्वृन्दमनोज्ञकाव्यततिभिर्यः स्तूयते सर्वदा, भूपालप्रतिबोधको गुरुमतिः सिद्धान्तपारङ्गमी ।
व्याख्यादानविचक्षणः शुभगुणैर्विख्यातकीर्तिः सुधीः, आनन्दाब्धिमुनीश्वरं गणपतिं वन्दे महाज्ञानिनम् ॥

णमो सिद्धाणं ।

महोपाध्यायश्रीविनयविजयविरचित–श्रीलोकप्रकाशे

आमुख ।

अतिगहन विषयोथी भरपूर श्रीलोकप्रकाश नामा महाग्रन्थने चार विभागमां पण, परिपूर्णरूपे प्रजा समक्ष मूकतां परम आह्लाद थाय छे. शेठ देवचन्द लालभाई जैन पुस्तकोद्धार फंड, के जेमांथी अत्यार सुधी अमूल्य ग्रन्थो, श्रीमद् आचार्य म० आनन्दसागरजी सूरीश्वरादि मुनिवर्य्योनी महत्कृपावडे प्रसिद्ध करवामां आव्याछे, तेना ८६मा अङ्क तरीके आ चोथा विभागने प्रसिद्ध करवामां आवे छे.

महोपाध्याय विनयविजयजीमहाराजानुं जीवन, संशोधक श्रीमद् आनन्दसागरजी सूरीश्वरजीनो उपोद्घात, अने विषयानुक्रम इत्यादि प्रसिद्ध करवुं हतुं, परन्तु यन्त्रो, कोठाओ अने चित्रोनो पांचमो विभाग बहार पाडवानी इच्छा होवाथी आमां कशुं लीधुं नथी.

चारे विभागनुं संशोधन करवा माटे श्रीमद् आनन्दसागरजी सूरीश्वरजीनो, तेमज हस्तप्रत आपवा माटे श्रीजैनानन्दपुस्तकालय, सुरतना कार्यवाहकोनो उपकार मानिये छिये.

सुरत–गोपीपुरा ता. २६ सप्टेम्बर १९३६ }
सं० १९९२ द्वितीय भाद्रपद शुक्ल १० शनिवार. }

जीवनचन्द साकरचन्द जव्हेरी,
पोता अने अन्य मानार्थ संचालको माटे.

॥ अथ श्रीकाललोकप्रकाशे चतुस्त्रिंशत्तमः सर्गः प्रारभ्यते ॥

इत्यस्यामवसर्पिण्यां, यथोक्ता उत्तमा नराः । वाच्यास्तथाऽवसर्पिण्युत्सर्पिणीष्वखिलासु ते ॥ १ ॥ स्यातां किंत्ववसर्पिण्यामादिमौ जिनचक्रिणौ । तृतीयारकपर्यन्ते, परे तुर्यारकेऽखिलाः ॥ २ ॥ उत्सर्पिण्यां तु सर्वेऽमी, स्युस्तृतीयारके क्रमात् । परं तुर्यारकस्यादावन्तिमौ जिनचक्रिणौ ॥ ३ ॥ या दृश्यतेऽवसर्पिण्यामायुर्देहादिका स्थितिः । उत्सर्पिणीमुखे तादृग्, जिनचक्र्यादिदेहिनाम् ॥ ४ ॥ भाव्यमेवं प्रातिलोम्यं, पदार्थेष्वखिलेष्वपि । उत्सर्पिण्यवसर्पिण्योर्व्यक्त्या तु कियदुच्यते ॥ ५ ॥ अथ प्रकृतम्—इत्येवमवसर्पिण्यां, दुष्षमासुषमारके । पूर्णे सति प्रविशति, पञ्चमो दुष्षमारकः ॥ ६ ॥ अस्मिन् कालेऽपि पूर्वोक्तं, भूमिवृक्षादिवर्णनम् । अनुसंधीयतां किंत्वनन्तघ्नन्यूनपर्यवम् ॥ ७ ॥ स्यात् संहननमत्रादौ, संस्थानमपि षड्विधम् । व्यवच्छेदे क्रमादेकं, सेवार्त्तमवतिष्ठते ॥८॥ यथाऽस्यामवसर्पिण्यामरेऽस्मिन् प्रथमे गते । दिवं गते स्थूलभद्रे, वज्रर्षौ तच्चतुष्टयम् (अर्धनाराचव्युच्छेदोक्तेः) ॥९॥ त्रिंशमब्दशतं चायुः, स्यादत्रादौ शरीरिणाम् । कालक्रमाद्धीयमानमन्ते विंशतिवार्षिकम् ॥ १० ॥ सप्तहस्तमितं देहं, स्यादत्रादौ शरीरिणाम् । एकहस्तमितं चान्ते, हीयमानं यथाक्रमम् ॥ ११ ॥ चतुर्थारकजातानामिह मोक्षोऽपि संभवेत् । एतस्मिन्नरके जातजन्मनां तु भवेन्न सः ॥ १२ ॥ जाते तु निर्वाणोच्छेदे, संहननानुसारतः । शरीरिणो यथाकर्म, स्युश्चतुर्गतिगामिनः ॥ १३ ॥ दुर्लक्षणे पुत्र इव, वर्द्धमानेऽरकेऽत्र च ।

क्रमादुच्छेदमायान्ति, सद्भावाः केवलादयः ॥१४॥ न मनःपर्यवज्ञानं, न चात्र परमावधिः। क्षपकोपशमश्रेण्यौ, नैवमाहारकं वपुः ॥ १५॥ लब्धिर्नात्र पुलाकाख्या, नाप्यन्त्यं संयमत्रयम् । सामायिकं स्याच्छेदोपस्थापनीयं च कुत्रचित् ॥ १६ ॥ नात्र तादृग्लब्धिमन्तो, नार्हन्तो न च चक्रिणः। वासुदेवादयो नैव, शलाकापुरुषा इह ॥१७॥ जातिस्मृत्यवधिज्ञानवैक्रियोद्भावनादयः। ये भावा अव्यवच्छिन्नास्तेऽपि कालानुभावतः ॥१८॥ भवन्ति विरला एव, गुणा इव दुरात्मनि। आर्हतानामपीह स्युर्मतभेदा अनेकशः ॥१९॥ युग्मं॥ जनाः प्रायेण बहुलकषाया दुर्णयप्रियाः। अधर्मरागिणो धर्मद्विष्टा मर्यादयोज्झिताः ॥ २० ॥ ग्रामाः श्मशानतुल्याः स्युर्ग्रामाभनगराणि (ग्रामाभाणि पुराणि)च। कुटुम्बिनश्चेटतुल्या, राजानश्च यमोपमाः ॥ २१ ॥ वित्तं गृह्णन्ति लोभान्धा, महीपाला नियोगिनाम्। प्रजानां तेऽधमाश्चैवं, मात्स्यो न्यायः प्रवर्त्तते ॥ २२ ॥ उत्तमा मध्यमाचारा, मध्यमाश्चान्त्यचेष्टिताः । विसंस्थुलाश्च देशाः स्युर्दुर्भिक्षाद्यैरुपद्रवैः ॥ २३ ॥ मितं वर्षति पर्जन्यो, न वर्षत्यपि कर्हिचित्। वर्षत्यकाले काले च, न जनैः प्रार्थितोऽपि सः ॥ २४ ॥ अन्नं निष्पद्यतेऽनेकैरुपायैः सेवनादिभिः। निष्पन्नमपि तत् कीरशलभाद्यैर्विनश्यति ॥ २५ ॥ वदान्या धार्मिका न्यायप्रियास्ते निर्धना जनाः। अनीतिकारिणो दुष्टाः, कृपणाश्च धनैर्भृताः ॥ २६ ॥ निर्धना बहुपत्याः स्युर्धनिनोऽपत्यवर्जिताः । आढ्या मन्दाग्नयो रुग्णा, दृढाङ्ग्य(न्या)ङ्गाश्च दुर्विधाः ॥२७॥ दृढाङ्गा नीरुजो मूर्खाः, कृशाङ्गाः शास्त्रवेदिनः। विलसन्ति खलाः स्वैरं, प्रायः सीदन्ति साधवः ॥ २८ ॥ अतिवृष्टिरवृष्टिश्च, मूषकाः शलभाः शुकाः। स्वचक्रं परचक्रं च, स्युर्भून्नेतीतयो

२०

२५

२७

भुवि ॥ २९ ॥ रात्रौ चौराः पीडयन्ति, प्रजां भूपाः करैर्दिवा । नीरसामपि शैलक्ष्मामिव दावाग्निभानवः ॥३०॥
आधिकारिण एव स्युर्नृपाणामधिकारिणः । लञ्चासेवादिभिर्वश्या, न्यायमार्गानपेक्षिणः ॥ ३१ ॥ नृपा मिथ्या-
दृशो हिंस्रा, मृगयादिषु तत्पराः । विप्राद्योऽपि लोभान्धा, लोकानां विप्रलम्भकाः ॥ ३२ ॥ असंयता अवि-
रता, नानाऽनाचारसेविनः । गुरुंमन्यास्तेऽपि विप्राः, पूज्यन्ते भूरिभिर्जनैः ॥ ३३ ॥ पाखण्डिनोऽपि विविधैः,
पाखण्डैर्भद्रकान् जनान् । प्रतारयन्ति दुःखाब्धेर्वयं निस्तारका इति ॥ ३४ ॥ म्लेच्छमिथ्यादृगादीनां, स्वस्वा-
चारे दृढास्थता । आर्हतानां च शुद्धेऽपि, धर्मे न प्रत्ययो दृढः ॥ ३५ ॥ पञ्चाग्निमाघस्नानादीन्यन्ये कष्टानि
कुर्वते । आर्हतास्त्वलसायन्ते, सुकरावश्यकादिषु ॥३६॥ यत्याभासा गणं त्यक्त्वा, स्युः केचित् स्वैरचारिणः ।
श्राद्धा अप्यनुगच्छन्ति, तान् बाला ग्रहिलानिव ॥ ३७ ॥ गणस्थिताश्च निर्ग्रन्था, धर्मोपकरणेष्वपि । ममत्वा-
भिनिवेशेन, स्युः परिग्रहविप्लुताः ॥ ३८ ॥ आराधयन्ति नो शिष्या, गुरून् गुणगुरूनपि । विज्ञंमन्या गुरु-
भ्योऽपि, विनयं न प्रयुञ्जते ॥ ३९ ॥ तनयाश्चावजानन्ति, मातापित्रादिकानिति । जानन्ति किममी तत्त्वं,
जराजर्जरबुद्धयः ? ॥ ४० ॥ परस्परं विरुध्यन्ते, स्वजनाः सोदरादयः । परकीयैश्च सौहार्दं, कुर्वते हार्ददर्-
शिनः ॥ ४१ ॥ बाल्ये प्रव्राजिताः शिष्याः, पाठिताः शिक्षिताः श्रमात् । गुरोस्तेऽपि प्रतीपाः स्युर्ये कीटाः
कुञ्जरीकृताः ॥ ४२ ॥ प्रहिता ये वणिज्यायै, विश्वस्तैरन्यभूमिषु । श्रेष्ठिनां तेऽपि सर्वस्वं, मुष्णन्त्याढ्यीकृता
अपि ॥ ४३ ॥ छलेनाश्वास्य जल्पाद्यैः, क्षत्रिया घ्नन्ति वैरिणः । प्रायेणानीतियुद्धानि, कुर्वते मृत्युभीरवः ॥४४॥

स्नुषाः श्वशुरयोः सम्यग्, विनयं न वितन्वते । प्रसादमुचितं तेऽपि, वधूटीषु न कुर्वते ॥ ४५ ॥ यैः सर्व-स्वव्ययैः पोषं, पोषमुद्वाह्य वर्द्धिताः । तेभ्यः पितृभ्यो भिन्नाः स्युः, क्रोधान्धाः स्त्रीमुखाः सुताः ॥ ४६ ॥ प्रविश्य हृदयं पत्युः, खरा वक्रमुखी वधूः । पितृपुत्रौ पृथक्कुर्यात्, कुञ्चिकेवाशु तालकम् ॥४७॥ मातापित्रो-रविश्वासः, श्वश्रूश्वशुरयोः पुनः । विश्वासः परमः पत्नीवचसा हन्ति मातरम् ॥ ४८ ॥ नापि पुष्णन्ति संपन्नाः, पितृमात्रादिपक्षजान् । पत्नीवर्ग्यांश्च पुष्णन्ति, वित्तवस्त्राशनादिभिः ॥ ४९ ॥ स्नुषासुतेषु प्रौढेषु, गृहे विषय-सेविषु । सेवन्ते विषयान् वृद्धाः, पितरोऽपि गतत्रपाः ॥ ५० ॥ वलीलुलितचर्मापि, पलितश्वेतकूर्चकः । कम्प्रः श्लथोऽपि नो बालामुद्वहन् लज्जते जनः ॥ ५१ ॥ विक्रीणते सुताः केचिद्दुरवस्थाः सुतानपि । आसन्नमृत्यवे दद्युः, स्वपुत्रीं धनलिप्सवः ॥ ५२ ॥ राजामात्यादयो येऽपि, न्यायमार्गप्रवर्त्तकाः । ते परान् शिक्षयन्तोऽपि, स्वयं स्युर्व्यभिचारिणः ॥ ५३ ॥ साकूतोक्तिकटाक्षौघैः, स्तनदोर्मूलदर्शनैः । गणिका इव चेष्टन्ते, निस्त्रपाः कुल-योषितः ॥ ५४ ॥ मातुः स्वसुः समक्षं स्युः, पुत्राद्या भाण्डवादिनः । श्वशुरादिसमक्षं च, वदन्त्येवं स्नुषा अपि ॥ ५५ ॥ वञ्चकाः स्वार्थनिष्ठाश्च, स्युर्मिथः स्वजना अपि । वृत्तिं कुर्वन्ति वणिजो, दम्भैः कूटतुलादिभिः ॥५६॥ हानिः प्रत्युत वाणिज्ये, दुष्कराऽऽजीविका नृणाम् । न च लाभोऽपि संतुष्टिस्तृष्णा स्यादधिकाधिका ॥ ५७ ॥ बहवो दुर्विधा लोका, खिद्यन्ते धनकाङ्क्षया । विषयाणां तृष्णयैव, पूरयन्त्यखिलं जनुः ॥ ५८ ॥ रूपचातुर्यु-दारेषु, निजदारेषु सत्स्वपि । परदारेषु मन्यन्ते, रन्त्वाऽऽत्मानं गुणाधिकम् ॥ ५९ ॥ स्यादकिञ्चित्करो लोके,

सरलः सत्यवाग्जनः । कुटिलो वक्रवादी च, प्रायः स्याज्जनतादृतः ॥ ६० ॥ वेश्यावीवाहसीमन्तादिषु संसार-कर्मसु । ऋणं कृत्वाऽपि वित्तानि, विलसन्ति घना जनाः ॥ ६१ ॥ चैत्योपाश्रयदेवार्चाप्रतिष्ठाद्युत्सवेषु तु । उपदेशं न शृण्वन्ति, शक्ता अप्येडमूकवत् ॥ ६२ ॥ श्रद्धाहानिर्द्रव्यहानिर्धर्महानिर्यथाक्रमम् । आयुर्हानिर्वपुर्हानिः, सारहानिश्च वस्तुषु ॥ ६३ ॥ कौटिल्यमग्रजः स्वल्पं, वेत्त्यनल्पं ततोऽनुजः । यथाकनिष्ठमित्येवं, तद्वर्धताधिकाधिकम् ॥ ६४ ॥ मणिमन्त्रौषधीतन्त्रास्तादृग्माहात्म्यवर्जिताः । देवा भवन्ति नाध्यक्षाः, सम्यगाराधिता अपि ॥ ६५ ॥ स्वल्पतुच्छाऽरसफलाः, सहकारादयो द्रुमाः । गोमहिष्यादयोऽप्यल्पदुग्धास्तान्यरसानि च ॥६६॥ दुर्णयो वर्द्धते कूटतुलादिर्लोभवृद्धितः । ततः स्युर्जलदास्तुच्छाः, पृथिवी नीरसा ततः ॥ ॥ ६७ ॥ औषध्यस्तेन निस्सारा, मानवानां ततः क्रमात् । आयुर्देहबलादीनां, परिहाणिः प्रवर्त्तते ॥ ६८ ॥ तथोक्तं तन्दुलवैचारिके—
"संघयणं संठाणं उच्चत्तं आउयं च मणुआणं । अणुसमयं परिहायई ओसप्पिणिकालदोसेण ॥ ६९ ॥ कोहमयमायलोभा ओसन्नं वड्ढए य मणुआणं । कूडतुलकूडमाणा तेणऽणुमाणेण सव्वंपि ॥ ७० ॥ विसमा अज्ज तुलाउ विसमाणि य जणवएसु माणाणि । विसमा रायकुलाइं तेण उ विसमाइं वासाइं ॥ ७१ ॥ विसमेसु अ वासेसु हुंति असाराइं ओसहिबलाइं । ओसहिदोब्बल्लेण य आउं परिहायइ नराणं ॥ ७२ ॥"

बकुशाश्च कुशीलाश्च, स्युर्द्विधैवात्र साधवः । न स्युः पुलाकनिर्ग्रन्थस्नातकाः कालदोषतः ॥ ७३ ॥ यस्यातिचारपङ्केन, चारित्रं बकुशं भवेत् । बकुशः श्रमणः स स्यात्, बकुशं नाम कर्बुरम् ॥७४॥ स च द्विधोपकरणदेहा-

तिचारभेदतः । आद्यस्तत्रर्तुबद्धेऽपि, काले निर्णेक्ति चीवरम् ॥ ७५ ॥ परिधत्ते विभूषायै, श्लक्ष्णं सारं तदीहते । दण्डपात्रादिकं मृष्टं, कृतशोभं बिभर्त्ति च ॥ ७६ ॥ मात्राधिकं चेहते तत्, बकुशोऽयमिहादिमः । अन्यस्तु नखकेशादि, विना कार्यं विभूषयन् ॥ ७७ ॥ बकुशो द्विविधोऽप्येष, स्वस्येच्छति परिच्छदम् । पाण्डित्यादियशः-काङ्क्षी, सुखशीलः क्रियालसः ॥ ७८ ॥ तथोक्तं पञ्चनिर्ग्रन्थ्यां—“ तह देससवछेयारिहेहिं सबलेहिं संजुओ बउसो । मोहक्खयत्थमब्भुट्ठिओ य सुत्तंमि भणियं च ॥ ॥ १ ॥ उवगरणदेहचुक्खा रिद्धिजसगारवासिया निच्चं । बहुसबलछेयजुत्ता निग्गंथा बाउसा भणिया ॥ २ ॥” शीलं यस्येह चारित्रं, कुत्सितं स कुशीलकः । प्रतिसेवाकषायाभ्यां, द्विविधः स प्रकीर्त्तितः ॥ ७९ ॥ द्वैधोऽप्ययं पञ्चविधो, ज्ञानदर्शनयोर्भवेत् । तपश्चारित्रयोश्चैव, यथासूक्ष्मे च तादृशः ॥ ८० ॥ स ज्ञानादिकुशीलो यो, ज्ञानादीनुपजीवति । यथासूक्ष्मस्तु स स्याद्यः, प्रीयते स्वप्रशंसया ॥ ८१ ॥ ज्ञानादिषु कुशीलाः स्युः, पञ्चामी प्रतिसेवया । कषायतोऽथ ज्ञानादिकुशीलान् ब्रूमहे परान् ॥ ८२ ॥ यः कषायैः संज्वलनैस्तपो ज्ञानं च दर्शनम् । अनुयुङ्क्ते कषायेण, स ज्ञानादिकुशीलकः ॥ ८३ ॥ शापं यच्छंश्च चारित्रकुशीलः स्यात् कषायतः । यथासूक्ष्मश्च मनसा, यः क्रोधादिकषायकृत् ॥ ८४ ॥ यद्वा कषायैः क्रोधाद्यैर्यो ज्ञानादिविराधकः । कषायतः स ज्ञानादिकुशील इह कीर्त्तितः ॥ ८५ ॥ पुलाकमिह निःसारं, धान्यं तादृक्चरित्रयुक् । स लब्धिप्रतिसेवाभ्यां, पुलाको द्विविधः स्मृतः ॥ ८६ ॥ यतिर्यया चक्रिसैन्यमपि चूर्णयितुं क्षमः । लब्धिः सा स्यात्पुलाकाख्या, तां सङ्घादिप्रयोजने ॥ ८७ ॥ प्रयुञ्जानो भवेल्लब्धिपुलाकोऽन्यस्तु पञ्चधा ।

पंचमारकवर्णने बकुशकुशीलः

२०

२५

॥५४४॥

२८

ज्ञानदर्शनचारित्रलिङ्गसूक्ष्मविभेदतः ॥८८॥ युग्मम् ॥ ज्ञानं दोषैः स्खलिताद्यैः, शङ्कितादैश्च दर्शनम्। मूलोत्तरातिचारैश्च, चारित्रं यो विराधयेत् ॥ ८९॥ स ज्ञानादिपुलाकः स्यात्कुर्यान्निष्कारणं च यः। वेषान्तरं भवेल्लिङ्गपुलाकः स श्रुतोदितः॥ ९० ॥ युग्मम् ॥ संयताऽकल्प्यवस्तूनां, मनसा यो निषेवकः। स निर्दिष्टो यथासूक्ष्मपुलाकः श्रुतपारगैः ॥ ९१ ॥ विनिर्गतो मोहनीयकर्माख्याद् ग्रन्थतोऽत्र यः। स निर्ग्रन्थो द्विधा क्षीणोपशान्तमोहभेदतः ॥९२॥ शुक्लध्यानजलैः स्नातो, दूरं कर्ममलोज्झितः। स स्नातकः सयोगी चायोगी चेति द्विधा भवेत् ॥९३॥ ततश्च—अरकेऽस्मिंश्च बकुशकुशीलाख्येऽपि संयमे। भवेत्क्रमेणापकर्षः, शक्तिसत्त्वादिहानितः ॥ ९४ ॥ सत्यप्येवं भवेयुर्ये, मूढाः सङ्घे चतुर्विधे। धर्मे च नास्तिकाः कार्यास्ते भव्यैः सङ्घतो बहिः ॥ ९५ ॥ यथा घृतादिवस्तूनां, पूर्वकालव्यपेक्षया। स्नेहमाधुर्यादिहानिर्यद्यप्यध्यक्षमीक्ष्यते ॥ ९६ ॥ तथापि कार्यं तत्साध्यं, स्यात्तैरेव घृतादिभिः। न पुनस्तत्पदन्यस्तैः, स्वच्छैरपि जलादिभिः ॥ ९७ ॥ पूर्वर्ष्यपेक्षयैवं च, हीनहीनगुणैरपि। मोक्षमार्गोद्यवासिः स्यान्निर्ग्रन्थैरेव नापरैः ॥ ९८ ॥ विषमेऽपि च कालेऽस्मिन्, भवन्त्येव महर्षयः। निर्ग्रन्थैः सदृशाः केचिच्चतुर्थारकवर्त्तिभिः ॥ ९९ ॥

यथाऽस्यामवसर्पिण्यामेतस्मिन् पञ्चमेऽरके। त्रयोविंशतिरादिष्टा, उदयाः सततोदयैः ॥ १०० ॥ विंशतिः १ प्रथमे तत्र, युगप्रधानसूरयः। उदये स्युर्द्वितीयस्मिन्, त्रयोविंशतिरेव ते २ ॥ १ ॥ तृतीयेऽष्टाढ्यनवतिः ३, चतुर्थे चाष्टसप्ततिः ४। पञ्चसप्तति ५ रेकोननवतिः ६ शतमेव ७ च ॥ २॥ सप्ताशीति ८ स्तथा पञ्चनवतिश्च ९

तत: परम् । सप्ताशीतिः १० षट्सप्तति ११ रष्टसप्ततिरेव च १२ ॥ ३ ॥ चतुर्नवति १३ रेवाष्टौ १४, त्रयः १५ सप्त १६ चतुष्टयम् १७ । शतं पञ्चदशोपेतं १८, त्रयस्त्रिंशं शतं १९ शतम् २० ॥ ४ ॥ पञ्चाधिकाऽथ नवति २१ र्नवतिश्च नवाधिका २२ । चत्वारिंशत् २३ क्रमादेते, यथोक्तोदयसूरयः ॥ ५ ॥ श्रीसुधर्मा १ च वज्रश्च २, सूरिः प्रतिपदाभिधः ३ । हरिस्सहो ४ नन्दिमित्रः ५, शूरसेन ६ स्तथाऽपरः ॥ ६ ॥ रविमित्रः ७ श्रीप्रभश्च ८, सूरिर्मणिरथाभिधः ९ यशोमित्रो १० धनशिखः ११, सत्यमित्रो १२ महामुनिः ॥ ७ ॥ धम्मिल्लो १३ विजयानन्द १४ स्तथा सूरिः सुमङ्गलः १५ । धर्मसिंहो १६ जयदेवः १७, सुरदिन्नाभिधो गुरुः १८ ॥ ८ ॥ वैशाख-१९ श्चाथ कौडिण्य २० सूरिः श्रीमाथुराह्वयः २१ । वणिक्पुत्रश्च २२ श्रीदत्त २३, उदयेष्वाद्यसूरयः ॥ ९ ॥ स्यात्पुष्पमित्रो १ ऽर्हन्मित्रः २, सूरिर्वैशाखसंज्ञकः ३ । सुकीर्त्तिः ४ स्थावरो ५ रथसुतश्च ६ जयमङ्गलः ७ ॥ १० ॥ ततः सिद्धार्थ ८ ईशानो ९, रथमित्रो १० मुनीश्वरः । आचार्यो भरणीमित्रो ११, दृढमित्राह्वयोऽपि च १२ ॥ ११ ॥ संगतिमित्रः १३ श्रीधरो १४, मागध १५ श्चामराभिधः १६ । रेवतीमित्र १७ सत्कीर्त्तिमित्रौ १८ च सुरमित्रकः १९ ॥ १२ ॥ फल्गुमित्रश्च २० कल्याण २१ सूरिः कल्याणकारणम् । देवमित्रो २२ दुष्प्रसह २३, उदयेष्वन्त्यसूरयः ॥ १३ ॥ श्रीसुधर्मा च जम्बूश्च, प्रभवः सूरिशेखरः । शय्यम्भवो यशोभद्रः, संभूतिविजयाह्वयः ॥ १४ ॥ भद्रबाहुस्थूलभद्रौ, महागिरिसुहस्तिनौ । घनसुन्दरश्यामार्यौ, स्कन्दिलाचार्य इत्यपि ॥ १५ ॥ रेवतीमित्रधर्मौ च, भद्रगुप्ताभिधो गुरुः । श्रीगुप्तवज्रसंज्ञार्यरक्षितौ पुष्पमित्रकः ॥ १६ ॥ प्रथम-

२०

२५

॥५४५॥

२८

स्योदयस्येति, विंशतिः सूरिसत्तमाः । त्रयोविंशतिरुच्यन्ते, द्वितीयस्याथ नामतः ॥ १७ ॥ श्रीवज्रो नागहस्ती च, रेवतीमित्र इत्यपि । सिंहो नागार्जुनो भूतदिन्नः कालकसंज्ञकः ॥ १८ ॥ सत्यमित्रो हारिलश्च, जिनभद्रो गणीश्वरः । उमास्वातिः पुष्पमित्रः, संभूतिः सूरिकुञ्जरः ॥ १९ ॥ तथा माढरसंभूतो, धर्मः श्रीसंज्ञको गुरुः । ज्येष्ठाङ्गः फल्गुमित्रश्च, धर्मघोषाह्वयो गुरुः ॥ २० ॥ सूरिर्विनयमित्राख्यः, शीलमित्रश्च रेवतिः । स्वप्नमित्रो हरिमित्रो, द्वितीयोदयसूरयः ॥ २१ ॥ स्युस्त्रयोविंशतेरेवमुदयानां युगोत्तमाः । चतुर्युक्ते सहस्रे द्वे, मीलिताः सर्वसंख्यया ॥ २२ ॥ एकावताराः सर्वेऽमी, सूरयो जगदुत्तमाः । श्रीसुधर्मा च जम्बूश्च, ख्यातौ तद्भवसिद्धिकौ ॥ २३ ॥ अनेकातिशयोपेता, महासत्त्वा भवन्त्यमी ॥ घ्नन्ति सार्द्धद्वियोजन्यां, दुर्भिक्षादीनुपद्रवान् ॥ २४ ॥ एकादश सहस्राश्च, लक्षाश्च षोडशाधिकाः । युगप्रधानतुल्याः स्युः, सूरयः पञ्चमारके ॥ २५ ॥ तथोक्तं दुष्षमारकसङ्घस्तोत्रे—"जुगपवरसरिससूरी, दूरीकयभवियमोहतमपसरं । वंदामि सोलसुत्तर इगदसलक्खे सहस्से य ॥ १ ॥" 'सन्तु श्रीवर्द्धमानस्ये'त्यादिदीवालीकल्पे तु—"जुगप्पहाणसमाणा एगारस लक्ख सोलस सहस्सा । सूरीउ हुंति अरए पंचमए जाव दुप्पसहे ॥ २ ॥" कोटीनां पञ्चपञ्चाशल्लक्षास्तावन्त एव च । सहस्राश्च शताः पञ्च, सर्वे स्वाचारसूरयः ॥ २६ ॥ त्रयस्त्रिंशच्च लक्षाणि, सहस्राणां चतुष्टयी । चतुःशत्येकनवतिः, सूरयो मध्यमा गुणैः ॥ २७ ॥ अस्मिन्नेवारकेऽभूवन्, पूर्वाचार्या महाशयाः । श्रीजगच्चन्द्रसूर्याद्यास्तपागच्छान्व-

१ स्तोत्रे तु सहस्सपदस्य व्यत्ययेन योजनात् षोडशसहस्रोत्तरा एकादश लक्षा इत्यर्थः संपद्येत ।

यक्रमे ॥ २८ ॥ सूरयो बप्पभट्टयाख्या, अभयदेवसूरयः । हेमाचार्याश्च मलयगिर्याद्याश्चाभवन् परे ॥ २९ ॥ विजयन्तेऽधुनाऽप्येवं, मुनयो नयकोविदाः । अत्युग्रतपसश्चारुचारित्रमहिमाद्भुताः ॥ ३० ॥ एवं मध्यस्थया दृष्ट्या, पर्यालोच्य विवेकिभिः । न कार्यः शुद्धसाधूनां, संशयः पञ्चमेऽरके ॥ ३१ ॥ दुष्षमारकपर्यन्तावधिः सङ्घश्चतुर्विधः । भविष्यत्यव्यवच्छिन्न, इत्यादिष्टं जिनैः श्रुते ॥३२॥ तथोक्तं भगवत्यां—"जंबूदीवे णं भंते दीवे भारहे वासे इमीसे ओसप्पिणीए देवाणुप्पियाणं केवइयं कालं तित्थे अणुसज्जिस्सति ?, गो० ! जंबु० भारहे इमीसे ओस० ममं एक्कवीसं वाससहस्साइं तित्थे अणुसज्जिस्सति" इति भग श० ८ उ० ८, दीवालीकल्पे तूक्तं—"वासाण वीससहसा नवसय तिम्मास पंचदिण पहरा। इक्का घडिया दोपल अक्खर अडयाल जिण- धम्मो ॥ १ ॥" पर्यन्ते त्वरकस्यास्य, सूरिर्दुष्प्रसहाभिधः । रत्निद्वयोच्छ्रितो विंशत्यब्दजीवी भविष्यति ॥ ३३ ॥, स्वर्गाच्च्युत्वा समुत्पन्नो, गृहे द्वादशवत्सरीम् । स्थित्वा सामान्यसाधुत्वे, चत्वार्यब्दान्यसौ शुचिः ॥ ३४ ॥ चत्वार्यब्दानि सूरित्वे, स्थित्वाऽष्टाब्दानि च व्रते । स्वर्गमेष्यति सौधर्ममन्ते कृत्वाऽष्टमं कृती ॥ ३५ ॥ दशवैकालिकं जीतकल्पमावश्यकं च सः । अनुयोगद्वारवृत्तीर्नतेन्द्रो धास्यति श्रुतम् ॥ ३६ ॥ साध्वी तदा च फल्गुश्रीः, श्रावको नागिलाभिधः । सत्यश्रीः श्राविका चेति, ज्ञेयः सङ्घश्चतुर्विधः ॥ ३७ ॥ यतः—"एगो साहू एगा य साहुणी सड्ढओ य सड्ढी वा । आणाजुत्तो संघो सेसो पुण अट्ठिसंघो उ ॥ ३८ ॥" उत्कृष्टं श्रुतमेतेषां, दश-

२०

॥५४६॥

२५

२६

१ अरसविरसाद्युदकवर्षणादिकालमपसार्य स्यादुक्तमेतत् ।

वैकालिकावधि । षाण्मासिकतपस्तुल्यं, षष्ठभक्तं भविष्यति ॥ ३९ ॥ मन्त्रीशः सुमुखाभिख्यो, राजा विमलवाहनः । भविष्यतस्तदा लोके, नीतिमार्गप्रवर्त्तकौ ॥ ४० ॥ अयं दुष्प्रसहाचार्योपदेशेन करिष्यति । चैत्यस्यान्तिममुद्धारं, राजा श्रीविमलाचले ॥ ४१ ॥ कोट्येकैकादश लक्षाः, सहस्राणि च षोडश । उत्तमानां क्षितीशानां, संख्यैषा दुष्षमारके ॥४२॥ कोटयः पञ्चपञ्चाशल्लक्षाश्चापि सहस्रकाः । तावन्तोऽग्रशताः पञ्च पञ्चपञ्चाशदन्विताः ॥ ४३ ॥ (५५५५५५५५५) इयन्तो दुष्षमाकाले, निर्दिष्टा सर्वसंख्यया । नवभिः पञ्चकैर्नामधारिणोऽधमसूरयः ॥४४॥ इत्यर्थतो दीपालिकाकल्पे॥ एवं च सर्ववर्षावसर्पिणीष्वखिलास्वपि । पञ्चमानामरकाणां, यथार्हं भाव्यतां स्थितिः ॥ ४५ ॥ एवमुक्तस्वरूपस्य, पंचमस्यारकस्य च । प्रान्ते मूलाद् ज्ञातिधर्मो, विवाहादिर्विलीयते ॥ ४६ ॥ धर्मो विलीयते शाक्याद्यन्यपाखण्डिनामपि । राजधर्मो दुष्टशिष्टनिग्रहानुग्रहादिकः ॥ ४७ ॥ धर्मोऽथ श्रुतचारित्रलक्षणोऽपि विलीयते । साध्वादिनाशे तन्नाशः, पात्रनाशे घृतादिवत् ॥ ४८ ॥ तथा चोच्छिद्यते वह्निरन्नपाकादिभिस्सह । अतिस्निग्धेऽतिरूक्षे च, काले भवति नैष यत् ॥ ४९ ॥ अनतिस्निग्धरूक्षेषु, सुषमादुष्षमादिषु । कालेषूत्पद्यते वह्निस्तत्साध्याश्च क्रिया अपि ॥ ५० ॥

एवं पूर्णे पञ्चमेऽरेऽनन्तैर्वर्णादिपर्ययैः । हीयमानैः प्रविशति, दुष्षमादुष्षमारकः॥ ५१ ॥ स च कालो महाभीष्मः, शून्योऽशेषजनक्षयात् । प्रवर्द्धमानदुःखार्त्तलोकहाहारवाकुलः ॥ ५२ ॥ तस्मिन् कालेऽतिकठिना, दूरोदञ्चितधूलयः । वाता वान्ति भृशं भीष्मा, असह्याः प्राणहारिणः ॥ ५३ ॥ धूमायन्ते दिशोऽभीक्ष्णं,

परितोऽतिरजस्वला:। प्रसृत्वरान्धतमसैर्निरालोका दिवानिशम् ॥५४॥ कालरौक्ष्येणाङ्गरौक्ष्यादसह्यमहितं महः। शीतं मुञ्चति शीतांशुरुष्णं चोष्णकरः खरः ॥ ५५ ॥ सूर्यचन्द्रमसावेतौ, जगतामुपकारिणौ। हन्त कालपरावर्ते, स्यातां तावेव दुःखदौ ॥ ५६ ॥ सर्जादिक्षारसदृशरसवाःपूरवर्षिणः। करीषरसतुल्याम्बुमुचोऽम्लरसवारयः ॥ ५७ ॥ अग्निवद्दाहकृद्वारिकिरो विषमयोदकाः। वज्रोदकाः पर्वतादिप्रतिभेदप्रभूष्णवः ॥ ५८ ॥ विद्युत्पातकृतोऽभीक्ष्णं, कर्करादिकिरोऽसकृत्। जनानां विविधव्याधिवेदनामृत्युकृज्जलाः ॥५९॥ तदा चण्डानिलोद्धूततीव्रधारातिपातिनः। कर्णद्रोहिध्वनिकृतोऽसकृद्वर्षन्ति वारिदाः॥६०॥ चतुर्भिः कलापकं॥ एषां क्षारादिमेघानां श्रीजम्बूद्वीपप्रज्ञप्तिसूत्रवृत्त्योः कालमानमुक्तं न दृश्यते, 'अभिक्खणं अरसमेहा विरसमेहा खारमेहा खत्तमेहा यावत् वासं वासिहिंति' एतद्वृत्तावपि अभीक्ष्णं पुनःपुनरित्यादि, कालसप्ततौ तु एतेषां कालमानमेवं दृश्यते "तो खारग्गिविसंबिलविज्जुघणा सग दिणाणि बहुपवणं। वरिसिअ बहुरोगिजलं काहंति समं गिरिथलाइं ॥ १ ॥" ग्रन्थान्तरे तु एते क्षारमेघादयो वर्षशतोनैकविंशतिवर्षसहस्रप्रमाणदुष्षमाकालातिक्रमे वर्षिष्यन्तीति श्रीजम्बूद्वीपप्रज्ञप्तिवृत्तौ दृश्यते, ये जगज्जीवनास्तापच्छिदः सर्वेप्सितागमाः। एवं तेऽपि प्रवर्त्तन्ते, मेघाः कालविपर्यये ॥ ६१ ॥ नगरग्रामखेटादीन्, द्विपदांश्च चतुष्पदान्। अपदान् खेचरान् भूमिचरानम्भश्चरानपि ॥ ६२॥ अरण्यवासिनो द्वीपवासिनः शैलवासिनः। विद्याधरान्नैकविद्यासाधनोर्जितशक्तिकान् ॥ ६३॥ त्रसान् द्वित्रिचतुः पञ्चेन्द्रियांश्च स्थावरानपि। वृक्षगुल्मलतागुच्छौषधीर्नानातृणादिकान् ॥ ६४ ॥ विना वैताढ्यवृष-

भकूटेभ्योऽन्यान् धराधरान् । गङ्गासिन्ध्वादिसिन्धुभ्यः, परान् सर्वान् जलाश्रयान् ॥ ६५ ॥ विध्वस्येत्यादिकान् सर्वान्, भावांस्ते विषमा घनाः । भस्मीकुर्वन्ति दशसु, क्षेत्रेषु भरतादिषु ॥ ६६ ॥ पञ्चभिः कुलकं ॥ वर्षन्ति वैताढ्यादीनामुपर्यपि घना अमी । तत्रस्था अपि नश्यन्ति, खेचरास्तत्पुराणि च ॥ ६७ ॥ किंतु ते भूधरास्तेषां, प्रासादाः शिखराणि च । न मनागपि भिद्यन्ते, शाश्वतं ह्यविनश्वरम् ॥ ६८ ॥

अस्मिंश्च भरतक्षेत्रे, श्रीशत्रुञ्जयपर्वतः । तत्रापि काले भविता, शाश्वतप्राय एव यत् ॥ ६९ ॥ अशीतिं योजनान्येष, विस्तृतः प्रथमेऽरके । द्वितीये सप्ततिं षष्टिं, तृतीये कथितोऽरके ॥ ७० ॥ योजनानि च पञ्चाशत्तुरीये पञ्चमे पुनः । योजनानि द्वादश स्युः, सप्त हस्तास्ततोऽन्तिमे ॥ ७१ ॥ उत्सर्पिण्यां कराः सप्तारके ह्याद्ये द्वितीयके । योजनानि द्वादश स्युर्मानमेवं परेष्वपि ॥ ७२ ॥ पञ्चाशतं योजनानि, मूले यो विस्तृतोऽभवत् । दशोपरि तथाऽष्टोच्चो, विहरत्यादिमेऽर्हति ॥ ७३ ॥ विच्छिन्नेऽपि हि तीर्थेऽस्मिन्, कूटमस्यर्षभाभिधं । सुरार्चितं स्थास्यतीह, पद्मनाभजिनावधि ॥ ७४ ॥ अस्मिन्वृषभसेनाद्याः, संख्यातीता जिनेश्वराः । निर्वाणैश्च विहारैश्च, वहुशोऽपावयन् महीम् ॥ ७५ ॥ भाविनः पद्मनाभाद्या, अर्हन्तोऽत्र महागिरौ । निजैर्विहारनिर्वाणैः, पावयिष्यन्ति मेदिनीम् ॥ ७६ ॥ वर्त्तमानावसर्पिण्यामस्यां नेमिजिनं विना । त्रयोविंशतिरर्हन्तो, निन्युरेनं कृतार्थताम् ॥ ७७ ॥ पञ्चभिर्मुनिकोटीभिः, सहात्र वृषभप्रभोः । निर्वृतश्चैत्रराकायां, पुण्डरीको गणाधिपः ॥ ७८ ॥ चतुर्मासीं स्थितावत्राजितशान्ती जिनेश्वरौ । क्षेत्रमेतदनन्तानां सिद्धानां, विशदात्मनाम् ॥ ७९ ॥ श्रीनेमि-

गणभृन्नन्दिषेणो यात्रार्थमागतः । सत्प्रभावाश्रयं यत्राजितशान्तिस्तवं व्यधात् ॥ ८० ॥ जनकोटौ यथाकामं, भोजितायां यदर्ज्यते । तदेकेनोपवासेन, सुकृतं सिद्धभूधरे ॥ ८१ ॥ इत्याद्यर्थतः श्रीशत्रुञ्जयकल्पादौ ॥ प्रायः पापविमुक्ताः स्युस्तिर्यञ्चोऽत्र निवासिनः । प्रयान्ति सद्गतावेव, स्पृष्ट्वैनं श्रद्धया गिरिम् ॥ ८२ ॥ सर्वेषामपि तीर्थानां, यात्रया विश्ववर्त्तिनाम् । यावदुत्पद्यते पुण्यं, तावत्सिद्धाद्रियात्रया ॥ ८३ ॥ यश्चैत्यं जिनबिम्बं वा, कारयेत्सिद्धपर्वते । स भुक्त्वा सार्वभौमत्वं, भवेद्देवो महर्द्धिकः ॥ ८४ ॥ ध्वजं छत्रं पताकां च, स्थालभृङ्गार- चामरान् । विद्याधरो भवेद्दत्त्वा, रथं दत्त्वा च चक्रभृत् ॥ ८५ ॥ आहुर्विद्याप्राभृते च, नामान्यस्यैकविंशतिम् । यथाऽनुभावं कृतानि, मुनिस्वर्गिनरादिभिः ॥ ८६ ॥ तथाहुः—"विमलगिरि १ मुत्तिनिलओ २ सित्तुंजो ३ सिद्धखित्त ४ पुंडरिओ ५ । सिरिसिद्धसेहरो ६ सिद्धपव्वओ ७ तित्थराओ य ८ ॥ १ ॥ बाहुबली ९ मरुदेवो १० भगीरहो ११ सहसपत्त १२ सयपत्तो १३ । कूडसयट्ठुत्तरओ १४ नगाहिराओ १५ सहसकमलो १६ ॥ २ ॥ ढंको १७ कवडिनिवासो १८ लोहिचो १९ तालझउ २० कयंबुत्ति २१ । सुरनरमुणिकयनामो सो विमलगिरी जयउ तित्थं ॥ ३ ॥" एष चाशाश्वतो नाशान्मूलानाशाच्च शाश्वतः । ततः सोभयधर्मत्वाच्छाश्वतप्राय उच्यते ॥ ८७ ॥ अथ प्रकृतं—

अङ्गारमुर्मुरप्राया, भूमिर्भस्ममयी तदा । देहिभिर्दुष्करस्पर्शा, सतीव व्यभिचारिभिः ॥ ८८ ॥ कुरूपाश्च कुवर्णाश्च, दुर्गन्धा दुष्टलक्षणाः । हीनदीनस्वरा दुष्टगिरोऽनादेयभाषिताः ॥ ८९ ॥ निर्लज्जाः क्लेशकपटवैरद्रो-

हपरायणाः । निर्मर्यादा मिथो युद्धवधबन्धविसंस्थुलाः ॥ ९० ॥ अकार्यकारिणो नित्यमन्यायोत्पाततत्पराः ।
पित्रादिविनयाज्ञादिव्यवहारविवर्जिताः ॥ ९१ ॥ भूम्ना काणान्धबधिरा, न्यूनाङ्गुल्यादयः कृशाः । कुणयः
पङ्गवः श्यामाः, कामार्त्ता बाल्यतोऽपि हि ॥ ९२ ॥ प्ररूढप्रौढकठिनरोमाणः शूकरादिवत् । असंस्कृतश्मश्रु-
केशाः, प्रवृद्धनखराः खराः ॥ ९३ ॥ कृतान्तसदृशाः काला, नीलीकुण्डोद्गता इव । स्थूलव्यक्तस्नसाजालनद्धाः
स्फटितमौलयः ॥ ९४ ॥ बाल्येऽपि कपिलश्वेतमूर्द्धजा वलिभिः श्लथाः । अशक्ता निपतद्दन्ता, जरसा जर्जरा ५
इव ॥ ९५ ॥ घटोद्भटमुखा वक्रनासिकाः कुटिलेक्षणाः । उत्कण्डूयाः क्षतशतविगलत्पूयशोणिताः ॥ ९६ ॥
खरोष्ट्रगतयः संहननेनान्त्येन निर्बलाः । कुसंस्थानाः कुप्रमाणाः, कुस्थानशयनासनाः ॥ ९७ ॥ सदाऽप्यशुचयः
स्नानब्रह्मचर्यादिवर्जिताः । शास्त्रसंस्काररहिता, मूर्खा विकृतचेष्टिताः ॥ ९८ ॥ निस्सत्त्वाश्च निरुत्साहाः,
सोच्छिष्टा नष्टतेजसः । शीतोष्णपवनव्याधिप्रमुखार्त्तिशताश्रयाः ॥ ९९ ॥ प्रस्वेदमलसन्दोहबीभत्सा धूलि-
धूसराः । बहुक्रोधमानमाया, लोभमोहभयोदयाः ॥२००॥ व्रतैर्मूलोत्तरगुणैः, प्रत्याख्यानैश्च वर्जिताः । सम्यक्त्वे- १०
नापि रहिताः, प्रायः स्युर्मनुजास्तदा ॥ १ ॥ कदाचिदेषां केषांचित्, सम्यक्त्वं सम्भवत्यपि । संक्लिष्टाध्यवसाय-
त्वाद्विरतिस्तु न सर्वथा ॥ २ ॥ तथोक्तं भगवत्यां—'ओसण्णं धम्मसन्नपब्भट्ठा', जम्बूद्वीपप्रज्ञप्त्यां च—'ओसण्णं
धम्मसन्नसम्मत्तपरिब्भट्ठा' ओसन्नमिति प्रायोग्रहणात्कचित्सम्यक्त्वं प्राप्यतेऽपीति भावः । प्रायः कच्छपमत्स्या-
दिमांसक्षौद्रादिभोजिनः । तुच्छधान्याशिनः केऽपि, बह्वाहारा बहुक्षुधः ॥ ३ ॥ प्रायो विपद्योत्पद्यन्ते, तिर्यक्षु १४

अतिदुष्षमावर्णनं

नरकेषु ते । तिर्यग्भ्यो नरकेभ्यश्च, ते प्रायेण स्युरागताः ॥ ४ ॥ चतुष्पदा मृगव्याघ्रसिंहाश्वोतुवृकादयः । पक्षिणो ढङ्ककङ्काद्याः, सरटाद्याः सरीसृपाः ॥ ५ ॥ एतेऽपि सर्वे नरकतिर्यग्दुर्गतिगामिनः । स्युर्मांसभक्षिणः क्रूराध्यवसायाश्च निर्दयाः ॥ ६ ॥ षष्ठस्य चारकस्यादौ, नरा हस्तद्वयोच्छ्रिताः । हीयमानाः क्रमादन्ते, चैकहस्तोच्छ्रिता मताः ॥ ७ ॥ उत्कृष्टमायुरेतेषामादौ वर्षाणि विंशतिः । अन्ते षोडश वर्षाणि, हीयमानं शनैः शनैः ॥ ८ ॥ तथोक्तं—'सोलसवीसइवासपरमाउआ समणाउसो' इति श्रीजम्बू०प्र० सूत्रे, एतद्वृत्तावपि—इह कदाचित् षोडश वर्षाणि कदाचिच्च विंशतिर्वर्षाणि परममायुर्येषां ते इति, वीरचरित्रे तु षोडश स्त्रीणां वर्षाणि, विंशतिः पुंसां परमायुरिति ॥ वैताढ्यपर्वतादर्वाग्गङ्गायास्तटयोर्द्वयोः । बिलानि स्युर्नव नव, तावन्ति सिन्धुकूलयोः ॥ ९ ॥ षट्त्रिंशति बिलेष्वेवं, दक्षिणार्द्धनिवासिनः । वसन्ति मनुजाः पक्षिपशुगोधोरगादयः ॥ १० ॥ वैताढ्यात्परतः सिन्धुगङ्गयोः कूलयोर्द्वयोः । षट्त्रिंशति बिलेष्वेते, वसन्त्युत्तरपार्श्वगाः ॥ ११ ॥ द्वासप्ततिबिलान्येवं, स्युः क्षेत्रेषु दशस्वपि । तेषु तिष्ठन्ति बीजानि, सर्वेषामपि देहिनाम् ॥ १२ ॥ रथचक्राक्षमात्रोण्डो, रथाध्वमात्रविस्तृतः । तदा जलप्रवाहः स्यात्, सरितोः सिन्धुगङ्गयोः ॥ १३ ॥ तावदप्युदकं तासां, भूरिभिर्मत्स्यकच्छपैः । आकीर्णं पङ्किलं भूरिजीवमल्पतमाम्बुकम् ॥ १४ ॥ ननु क्षुल्लहिमवदादिषु शैलेषु नैधते । अरकाणां परावर्त्तस्ततस्तज्जातजन्मनाम् ॥ १५ ॥ गङ्गादीनां निम्नगानां, हानिः षष्ठेऽरके कथम् ? । किं चैवं कथमेतासां, विघटेत न नित्यता ? ॥ १६ ॥ अत्रोच्यते—हिमवत्पर्वतोत्थस्य, हानिर्न स्यात् मनागपि । गङ्गादीनां

२० २५ ॥५४९॥ २८

प्रवाहस्य, स्वकुण्डनिर्गमावधि ॥ १७ ॥ ततः परं त्वेष यथा, शुभकालानुभावतः । नद्यन्तरसहस्रानुषङ्गेण वर्द्धते क्रमात् ॥ १८ ॥ तथा नद्यन्तरासङ्गाद्दुरितापात्तथा क्षितेः । शुष्यत्यपि प्रवाहोऽयं, दुष्टकालानुभावतः ॥ १९ ॥ पद्माद्दिह्रदनिर्गच्छत्प्रवाहापेक्षयैव च । स्याच्छाश्वतत्वमेतासा, ततो युक्तं यथोदितम् ॥ २० ॥ चतुर्भिः कलापकं । निवसन्ति मनुष्यास्ते, प्रागुक्तेषु बिलेष्वथ । भीष्मेषु घोरध्वान्तेषु, स्तेनाः कारागृहेष्विव ॥ २१ ॥ कृताकार्या इव बहिस्ते हि नागन्तुमीशते । गोपतेरुत्प्रतापस्य, करसंतापभीरवः ॥ २२ ॥ निशायामपि नेशास्ते, निर्गन्तुं बिलतो बहिः । असह्यं ददतो जाड्यं, विधोर्भीता निशाचरात् ॥ २३ ॥ रजनी गतचन्द्राऽपि, निशाचरवधूरिव । भवेत्प्राणोपघाताय, तेषां शीतार्त्तिवेपिनाम् ॥ २४ ॥ ततः प्रातः प्रदोषे च, नात्युष्णे नातिशीतले । निर्गच्छन्ति बिलेभ्यस्ते, शृगाला इव भीलवः ॥ २५ ॥ उपेत्य गङ्गासिन्धुभ्यो, गृहीत्वा मत्स्यकच्छपान् । स्थले क्षिपन्ति पाकार्थं, सद्यस्का दुर्जरा हि ते ॥ २६ ॥ दिवा तरणितापेन, रात्रौ शैत्येन भूयसा । तेषामाहारयोग्याः स्युः, कथिता नीरसाश्च ते ॥ २७ ॥ मन्दाल्पजठराग्नीनामपक्वाः सरसाश्च ते । न जीर्यन्तेऽन्यभावाच्च, तेषां पाकोऽप्यसम्भवी ॥ २८ ॥ आदाय पूर्वनिक्षिप्तान्, प्सान्ति ते मत्स्यकच्छपान् । भविष्यद्भोजनार्थं च, निक्षिपन्ति पुनर्नवान् ॥ २९ ॥ जीविका स्यात्सदाऽप्येषां, यदेवं पापसाधनम् । स्युस्तिर्यञ्चो नारकाश्च, प्रायस्तत्तेऽपि पापिनः ॥ ३० ॥ सूत्रे च प्रायःशब्दोक्तेः, क्षुद्रान्नकृतजीविकः । अक्लिष्टाध्यवसायश्च,

१ हिमवतो भरतनैकट्यात् तत्र नैव सिन्धुगंगाप्रवाहह्रान्यादि इति नैव क्वचिदाप्तोक्तं ।

कश्चित्स्वर्गेऽपि गच्छति ॥ ३१ ॥ तथाहुः—'ओसण्णमंसाहारा मच्छाहारा खुड्डाहारा' इत्यादि, तथा 'ओसण्णं णरगतिरिक्खजोणिएसु उववज्जिहिंति'त्ति श्रीजंबू०प्र० सूत्रे। तदा षड्वर्षवयसो, गरभं दधते स्त्रियः। सकृच्छ्रं सुवतेऽभीक्ष्णमपत्यानि बहूनि ताः ॥ ३२ ॥ बहुभिः पुत्रपौत्राद्यैः, क्लिश्यन्तेऽल्पायुषोऽपि ते । पापिनः पापिभिर्बालविट्चरैर्विट्चरा इव ॥ ३३ ॥ यूकामत्कुणलिक्षाद्या, येऽप्यमी क्षुद्रजन्तवः। तुदन्ति तेऽपि दुष्टास्तानजीर्णान्नान् गदा इव ॥ ३४ ॥

एवं षष्ठेऽरके पूर्णे, संपूर्णैतावसर्पिणी। उत्सर्पिणी प्रविशति, ततोऽमुष्या विलक्षणा ॥ ३५ ॥ आरम्भसमये योऽयमुत्सर्पिण्या भवेदिह । पञ्चदशानां कालानां, स एवादिक्षणो भवेत् ॥ ३६ ॥ ते चामी—आवल्या-१ ऽऽनप्राण २ स्तोक ३ लव ४ मुहूर्त्त ५ दिन ६ निशाः ७ करणम् ८। नक्षत्र ९ पक्ष १० मास ११र्त्वय १२ नानि च १३ हायन १४ युगे १५ च ॥ ३७ ॥ (आर्या) यद्यपि ग्रन्थान्तरे ऋतोराषाढादित्वेन कथनादत्र श्रावणमासे ऋतोरारम्भो न घटते, तथापि भगवतीवृत्त्युक्तस्य ऋतौ श्रावणादित्वपक्षस्याश्रयणात् न दोष इति जम्बूप्र० वृ०। एवं च—नभःश्यामप्रतिपदि, करणे बालवाभिधे। उत्सर्पिणी प्रविशति, नक्षत्रेऽभिजिदाह्वये ॥ ३८ ॥ तदैव च प्रविशति, दुष्षमदुष्षमाभिधः। अरकः प्रथमोऽमुष्या, उत्सर्पिण्या सुखाधमः ॥ ३९ ॥ अस्मिन् सर्वपदार्थानां, वर्णगन्धादिपर्यवाः। क्षणे क्षणे विवर्द्धन्ते, प्रभृति प्रथमक्षणात् ॥४०॥ प्राग्भावितोऽवसर्पिण्यां, यथाऽनन्तगुणक्षयः। वर्णादीनामुपचयो, भाव्योऽत्रानुक्षणं तथा ॥४१॥ मनुजाः प्राग्वदत्रापि, बिलवासिन एव ते। आयु-

उत्सर्पिणी-प्रवेशः

२०

२५

२७

देहादि पर्यायैः, किंतु वर्द्धिष्णवः क्रमात् ॥ ४२ ॥ प्रथमं षोडशाब्दानि, जनानामिह जीवितम् । वर्षाणि
विंशतिं चान्ते, वर्द्धमानं शनैः शनैः ॥ ४३ ॥ एकहस्तोच्चवपुषः, प्रथमं मनुजा इह । वर्द्धमानाः क्रमादन्ते,
भवन्ति द्विकरोच्छ्रिताः ॥ ४४ ॥ आहारादिस्वरूपं तु, तेषामत्रापि पूर्ववत् । प्रयान्ति दुर्गतावेव, मांसाहारा
अमी अपि ॥४५॥ एवमाद्येऽरके पूर्णे, द्वितीयः प्रविशत्यरः । दुष्षमाख्यः प्रातिलोम्यात्, प्रागुक्तदुष्षमोपमः ॥४६॥
प्रथमे समयेऽथास्य, पुष्करावर्त्तवारिदः । प्रादुर्भवेन्महीमाश्वासयन्नर्हन्निवामृतैः ॥ ४७ ॥ पुष्करं नाम शस्ताम्बु,
तेनावर्त्तयति क्षितेः । संहरत्यशुभावस्थां, पुष्करावर्त्तकस्ततः ॥४८॥ तत्तत्क्षेत्रप्रमाणः स्याद्विष्कम्भायामतः स
च । तीव्रार्कतापच्छेदाय, चन्द्रोदय इव क्षितेः ॥ ४९ ॥ क्षणात् क्षेत्रमभिव्याप्य, सर्वं स मृदु गर्जति । सान्त्वय-
न्निव भूलोकं, दुष्टमेघैरुपद्रुतम् ॥ ५० ॥ स चाभितः प्रथयति, विद्युतो द्युतिमालिनीः । शुभकालप्रवेशार्हा, इव
मङ्गलदीपिकाः ॥ ५१ ॥ मुशलस्थूलधाराभिः, स च वर्षन् दिवानिशम् । निर्वापयति भूपीठं, स्वादुस्वच्छहितो-
दकः ॥५२॥ स सप्तभिरहोरात्रैः, रेतःस्नेहामृतार्द्रिताम् । क्ष्मां कुर्याच्छान्तसंतापां, प्राणेश इव वल्लभाम् ॥५३॥
ततस्तस्मिन्नुपरते, पुष्करावर्त्तकाम्बुदे । प्रासवार इव प्रादुर्भवति क्षीरवारिदः ॥ ५४ ॥ सप्त प्राग्वदहोरात्रान्,
सोऽपि वर्षन् दिवाऽनिशम् । चारुगोक्षीरतुल्याम्बुर्वर्णादीन् जनयेत् क्षितौ ॥ ५५ ॥ क्षीराब्दे विरते तस्मिन्,
घृतमेघो घृतोदकः । सप्त वर्षन्नहोरात्रान्, स्नेहं जनयति क्षितेः ॥ ५६ ॥ अहोरात्रांस्ततः सप्त, वर्षन्नमृतवा-
रिदः । नानौषधीर्जनयति, नानावृक्षलताङ्कुरान् ॥ ५७ ॥ रसमेघस्ततः सप्ताहोरात्रान् सुरसोदकः । वनस्पतिषु

५

१०

१४

तिक्तादीन्, जनयेत् पञ्चधा रसान् ॥ ५८ ॥ पञ्चानामेव भेदानां, यद्रसेषु विचक्षणम् । तल्लवणमधुरयोरभेदस्य विवक्षया ॥ ५९ ॥ माधुर्यरससंसर्गो, लवणे स्फुटमीक्ष्यते । स्वादुत्वं लवणक्षेपे, भवेत् सर्वरसेषु यत् ॥ ६० ॥ अत्युत्तमा अमी मेघाः, पुष्करावर्त्तकादयः । जनयन्ति जगत्स्वास्थ्यं, पञ्चैव परमेष्ठिनः ॥ ६१ ॥ आद्योऽत्र शमये-द्दाहं, द्वितीयो जनयेच्छुभान् । वर्णगन्धरसस्पर्शान्, भुवः स्नेहं तृतीयकः ॥ ६२ ॥ तुर्यो वनस्पतीन् सर्वान्, पञ्चमस्तद्गतान् रसान् । आहुः प्रयोजनान्येवं, पञ्चानामप्यनुक्रमात् ॥ ६३ ॥ ततः क्रमाद्भवेद्भूमिर्भूरिभिर्नव-पल्लवैः । वृक्षगुच्छलतागुल्मतृणादिभिरलङ्कृता ॥६४॥ तदा प्रसन्ना तृप्ता च, भूमिर्भाति नवाङ्कुरा । रोमाञ्चितेव भूयिष्ठकालेन कृतपारणा ॥ ६५ ॥ प्राप्तधातुक्षया शुष्का, या मृतेवाभवन्मही । सा पुनर्यौवनं प्रापि, सत्कालेन रसायनैः ॥ ६६ ॥ मनोरमां सुखस्पर्शां, प्रोत्फुल्लद्रुममण्डिताम् । तदा विलोक्य ते भूमिं, मोदन्ते बिलवासिनः ॥ ६७ ॥ ततो बिलेभ्यस्ते मातृगर्भेभ्य इव निर्गताः । अपूर्वमिव पश्यन्ति, विश्वं प्राप्तमहासुखाः ॥ ६८ ॥ गणशस्तेऽथ सम्भूय, वदन्त्येवं परस्परम् । जातो भोः सुखकृत्कालो, रमणीयं च भूतलम् ॥ ६९ ॥ वनस्पति-भिरेभिश्च, दलपुष्पफलाञ्चितैः । मधुरैः पावनैः पथ्यैराहारो नो भवत्वथ ॥ ७० ॥ अतःपरं च यः कोऽपि, मत्स्यकूर्मादिजाङ्गलैः । करिष्यत्यशुभैर्वृत्तिं, स पापोऽस्मद्गणाद्बहिः ॥ ७१ ॥ तस्य नामापि न ग्राह्यं, वीक्षणीयं मुखं न च । छायाऽप्यस्य परित्याज्या, दूरेऽङ्गस्पर्शनादिकम् ॥ ७२ ॥ इति व्यवस्थां संस्थाप्य, ते रमन्ते यथा सुखम् । भूतलेऽलङ्कृते विष्वग्, रम्यैस्तृणलतादिभिः ॥ ७३ ॥ कुतश्चित्पुरुषात्तेऽथ, जातिस्मृत्यादिशालिनः ।

२० २५ ॥५५१॥ २८

क्षेत्राधिष्ठातृदेवाद्वा, कालानुभावतोऽपि च ॥ ७४ ॥ ते जनाः प्राप्तनैपुण्या, व्यवस्थामपरामपि । कुर्वन्ति नगरग्रामनिकायरचनादिकाम् ॥ ७५ ॥ अन्नपाकाङ्गसंस्कारवस्त्रालङ्करणान्यपि । वीवाहराजनीत्यादि, क्रमात्सर्वं प्रवर्त्तते ॥ ७६ ॥ तथोक्तं जम्बूद्वीपप्रज्ञप्तिवृत्तौ एतदरकवर्णने—"द्वितीयारे पुरादिनिवेशराजनीतिव्यवस्थादिकृज्जातिस्मारकादिपुरुषद्वारा वा क्षेत्राधिष्ठायकदेवप्रयोगेण वा कालानुभावजनितनैपुण्येन वा तस्य सुसम्भवत्वा"दिति ॥ षट् संस्थानानि ते दध्युः, क्रमात्संहननानि च । यान्ति कर्मानुसारेण, जना गतिचतुष्टये ॥ ७७ ॥ उत्कर्षादरकस्यादौ, ते विंशत्यब्दजीविनः । अन्ते च त्रिंशदधिकशतवर्षायुषो जनाः ॥ ७८ ॥ आदौ स्युर्द्विकरोत्तुङ्गवपुषस्ते ततः क्रमात् । वर्द्धमानोच्छ्रया अन्ते, सप्तहस्तसमुच्छ्रिताः ॥ ७९ ॥ वर्णगन्धरसस्पर्शजीवितोच्चत्वपर्यवैः । वर्द्धमानैर्वर्द्धमानैः, पूर्णेऽस्मिन् दुष्षमारके ॥ ८० ॥ तृतीयोऽरः प्रविशति, दुष्षमासुषमाभिधः । स प्रातिलोम्यात्पूर्वोक्तचतुर्थारकसन्निभः ॥ ८१ ॥ अरकस्यास्य पक्षेषु, गतेषु प्रथमक्षणात् । एकोननवतावाद्या, जिनोत्पत्तिः प्रजायते ॥ ८२ ॥ तथाहुः—"कालदुगे तिचउत्थारएसु एगूणनवइपक्खेसु । सेसगएसुं सिज्झति हुंति पढमंतिमजिणिंदा ॥ ८३ ॥" एषोऽवसर्पिणीजातचतुर्विंशजिनोपमः । प्रायोऽङ्गमानवर्णायुःकान्तिप्रभृतिपर्यवैः ॥८४॥ इत्युत्सर्पिण्यवसर्पिण्यर्हच्चक्र्याद्योऽखिलाः । प्रातिलोम्यानुलोम्याभ्यां, भाव्यास्तुल्या मनीषिभिः ॥ ८५ ॥ मिथोऽन्तरं तावदेव, यस्योत्पत्तिर्यदोदिता । शेषेऽरकेऽवसर्पिण्यां, सोत्सर्पिण्यां गतेऽरके ॥ ८६ ॥ गतेऽरकेऽवसर्पिण्यां, यस्योत्पत्तिर्यदोदिता । शेषेऽरके सोत्सर्पिण्यां, स्वयं भाव्या विवेकिभिः ॥ ८७ ॥ त्रयो-

५

१०

१४

विंशतिरर्हन्तस्तथैकादश चक्रिणः। अरकेऽस्मिन् भवन्त्येवं, सर्वेऽपि केशवादयः ॥ ८८ ॥ आयुरत्र शतं त्रिंशमादावत्राङ्गिनां भवेत्। पूर्वकोटिमितं चान्ते, वर्द्धमानं शनैः शनैः ॥ ८९ ॥ आदौ स्युः सप्तहस्तोच्चवपुषो मनुजास्ततः। वर्द्धमानाः पञ्चचापशतोच्चाङ्गाः स्मृताः श्रुते ॥ ९० ॥ एवं पूर्णे तृतीयेऽरे, चतुर्थः प्रविशत्यरः। स प्राक्तनतृतीयाभः, सुषमादुष्षमाभिधः ॥ ९१ ॥ एकोननवतौ पक्षेष्वतीतेष्वादिमक्षणात्। चतुर्विंशस्यार्हतोऽस्मिन्नुत्पत्तिः स्याज्जिनेशितुः ॥ ९२ ॥ अरकेऽस्मिन् भवत्येवं, द्वादशश्चक्रवर्त्यपि। तत्पद्धतिस्तु सर्वाऽपि, विज्ञेया पूर्ववर्णिता ॥ ९३ ॥ उत्सर्पिण्यां स्युस्त्रिषष्टिः, शलाकापुरुषा इति। दशक्षेत्र्यां तृतीयारे, तुर्याराद्यांशसंयुते ॥ ९४ ॥ एवं पञ्चमषष्ठारावपि भाव्यौ विपर्ययात्। पूर्वोदितावसर्पिण्या, द्वितीयाद्यारकोपमौ ॥ ९५ ॥

स च श्रेणिकराजस्य, जीवः सीमन्तकेऽधुना। नरके वर्त्तते रत्नप्रभायां प्रथमक्षितौ ॥ ९६ ॥ स्थितिं स तत्र चतुरशीतिवर्षसहस्रिकाम्। मध्यमामनुभूयाब्दैः, कियद्भिरधिकां ततः ॥ ९७ ॥ पादमूले भारतस्य, वैताढ्यस्य महागिरेः। देशे दूरगतक्लेशे, पाण्डुवर्द्धनसंज्ञके ॥९८॥ शतद्वाराभिधपुरे, सुतरत्नं भविष्यति। सुमतेः कुलकरस्य, भद्राख्यीकुक्षिसम्भवः॥ ९९ ॥ श्रीवीरपद्मनाभयोरन्तरं चैवं—"चुलसी वाससहस्सा, वासा सत्तेव पंच मासा य। वीरमहापउमाणं अंतरमेयं वियाणाहि ॥ १ ॥" इति नन्दीवृत्तौ, इदं वीरमहापद्मयोर्निर्वाणोत्पादयोरन्तरं ज्ञेयं, श्रेणिकराजजीवस्य तु नरके किञ्चिदुक्तान्तरकालादधिकमेवायुः सम्भवि, श्रेणिके मृते तु कियत्कालं वीरार्हत इह विहारात् तावतः कालस्य तदायुष्यधिकत्वादिति ॥ स चतुर्दशभिः स्वप्नैः, सूचितः शक्र-

२०

२५
॥५५२॥

२८

पूजितः । जनिष्यते दिने यस्मिन्, तस्मिंस्तत्र पुरेऽभितः ॥ ३०० ॥ अन्तर्बहिश्च पद्मानां, रत्नानां चातिभूयसाम् । वृष्टिर्भविष्यति प्राज्या, वारामिव तपात्यये ॥ १ ॥ ततः पित्रादयस्तस्य, मुदिता द्वादशे दिने । करिष्यन्ति महापद्म, इति नाम गुणानुगम् ॥ २ ॥ साधिकाष्टाब्दद्वयसमर्थेनं सुमतिः पिता । स्थापयिष्यति राज्ये स्वे, ततो राजा भविष्यति ॥ ३ ॥ राज्यं पालयतस्तस्य, शक्रस्येव महौजसः । देवौ महर्द्धिकावेत्य, सेविष्येते पदद्वयम् ॥ ४ ॥ यक्षाणां दाक्षिणात्यानां, पूर्णभद्राभिधः प्रभुः । माणिभद्रश्चौत्तराहयक्षाधीशः सुरेश्वरः ॥ ५ ॥ एतौ द्वावपि यक्षेन्द्रौ, प्रभोस्तस्य करिष्यतः । सेनान्याविव सैन्यस्य, कार्यं शत्रुजयादिकम् ॥ ६ ॥ सामन्तादिस्ततस्तस्य, श्रेष्ठिपौरजनादिकः । मिथः परिच्छदः सर्वः, सम्भूयैवं वदिष्यति ॥ ७ ॥ अहो सुरेन्द्रौ कुर्वाते, अस्यास्माकं महीपतेः । सेनाकार्यं महाश्चर्यपुण्यप्राग्भारशालिनः ॥ ८ ॥ महापद्मनृपस्याथ, देवसेन इति स्फुटम् । नामास्तु गुणनिष्पन्नं, द्वितीयं रुचिरं ततः ॥ ९ ॥ देवसेननृपस्याथ, राज्यं पालयतः क्रमात् । उत्पत्स्यते हस्तिरत्नं, चतुर्दन्तं महोज्वलम् ॥ १० ॥ शक्रमैरावणारूढमिव तं तेन हस्तिना । विचरन्तं शतद्वारपुरे वीक्ष्य जनाः समे ॥ ११ ॥ वदिष्यन्ति मिथस्ते यद्देवसेनमहीपतेः । वाहनं विमलो हस्ती, ततो विमलवाहनः ॥ १२ ॥ तृतीयमिति नामास्तु, त्रिनामैवं भविष्यति । महापद्मो देवसेनो, राजा विमलवाहनः ॥ १३ ॥ एवं त्रिंशतमब्दानि, राज्यं भुक्त्वा महाशयः । दानं दत्त्वाऽऽब्दिकं प्रौढोत्सवैः स प्रव्रजिष्यति ॥ १४ ॥ द्वादशाब्दानि सार्द्धानि, पक्षेणाभ्यधिकान्यथ । छद्मस्थत्वे तपः कृत्वा, स केवलमवाप्स्यति ॥ १५ ॥ सप्रतिक्रमणो

५ १० १४

धर्मो, यथा पञ्चमहाव्रतः । मुनीनां श्रावकाणां च, द्वादशव्रतबन्धुरः ॥१६॥ महावीरेण जगदे, जगदेकहितावहः । महापद्मोऽपि भगवांस्तथा सर्वं वदिष्यति ॥ १७ ॥ युग्मम् ॥ अस्य प्रभोर्गणधरा, एकादश गणा नव । श्रीवीरवद्भविष्यन्ति, वर्णलक्ष्मोच्छ्रयाद्यपि ॥ १८ ॥ कल्याणकानां पञ्चानां, तिथिमासदिनादिकम् । श्रीवर्द्धमानवद्भावि, पद्मनाभप्रभोरपि ॥ १९ ॥ सार्द्धषण्मासहीनानि, वर्षाणि त्रिंशतं च सः । पालयिष्यति सर्वज्ञपर्यायं सुरसेवितः ॥ २० ॥ द्विचत्वारिंशदब्दानि, श्रामण्यमनुभूय च । द्विसप्तत्यब्दसर्वायुः, परमं पदमेष्यति ॥ २१ ॥ सुपार्श्वो वर्द्धमानस्य, पितृव्यो यः प्रभोरभूत् । सूरदेवाभिधो भावी, स द्वितीयो जिनोत्तमः ॥ २२ ॥ पोट्टिलस्य च यो जीवः, स तृतीयो भविष्यति । सुपार्श्वनामा देहादिमानैर्नेमिजिनोपमः ॥ २३ ॥ यस्तु हस्तिनापुरवासी भद्रासार्थवाहीपुत्रो द्वात्रिंशद्भार्यात्यागी वीरशिष्यः सर्वार्थसिद्धोत्पन्नो महाविदेहान्तः सेत्स्यन्नौपपातिकोपाङ्गे (अनुत्तरोपपातिकांगे) प्रोक्तः स त्वन्य एव । जीवो दृढायुषस्तुर्यो, जिनो भावी स्वयम्प्रभः । कार्त्तिकात्मा च सर्वानुभूतिः पञ्चमतीर्थकृत् ॥ २४ ॥

श्रावस्त्यां शङ्खशतकावभूतां श्रावकोत्तमौ । तत्र कोष्ठकचैत्ये च, श्रीवीरः समवासरत् ॥ २५ ॥ भगवन्तं नमस्कर्तुं, शङ्खाद्याः श्रावका ययुः । ततो निवर्त्तमानांस्तान्, श्राद्धः शङ्खोऽब्रवीदिति ॥ २६ ॥ उपस्कारयत प्राज्यमाहारमशनादिकम् । यथा तदद्य भुञ्जानाः, पाक्षिकं पर्व कुर्महे ॥ २७ ॥ ते च शङ्खवचः श्राद्धास्तथेति प्रतिपेदिरे । शङ्खश्च निर्मलमतिर्गृहे गत्वा व्यचिन्तयत् ॥ २८ ॥ न श्रेयानद्य भुक्त्वा मे, पौषधः पाक्षिकेऽहनि ।

उत्सर्पिण्यां पद्मनाभादिजिनाः

२०

२५

२८

तत्कुर्वेऽपोषणेनैव, विशुद्धं पर्वपौषधम् ॥ २९ ॥ शङ्खमागमयन्ते स्म, श्राद्धास्ते सज्जभोजनाः । अनागच्छति त-
स्मिंश्च, तदाह्वानाय तद्गृहे ॥ ३० ॥ शतकापरनामा द्राक्, पुष्कली श्रावको ययौ । शङ्खभार्योत्पला चास्य,
चकाराभ्यागतोचितिम् ॥३१॥ युग्मम् । ततः पौषधशालायां, शङ्खाढ्यायां विवेश सः । प्रतिक्रम्येर्यापथिकं, शङ्ख-
श्रावकमित्यवक् ॥३२॥ सिद्धमन्नादि तच्छीघ्रमागच्छ श्रावकव्रजे । तद्भुक्त्वाऽद्य यथा पर्वपौषधं प्रतिजागृमः
॥३३॥ ऊचे शङ्खः पौषधिकोऽपोषणेनास्मि सोऽप्यथ । न्यवेदयत् तत्सर्वेषां, तत्ते बुभुजिरे ततः ॥३४॥ शङ्खोऽथा-
पारयित्वैव, पौषधं प्राणमज्जिनम् । प्रातः श्राद्धाः परेऽप्येवं, शुश्रुवुर्देशनां प्रभोः ॥३५॥ देशनाऽन्ते श्रावकास्ते,
गत्वा शङ्खस्य सन्निधौ । अवादिषुरुपालम्भं, ह्यः साध्वसानहीलयः ॥ ३६ ॥ ततस्तान् भगवानूचे, मा शङ्खं
हीलयन्तु भोः! । सुदृष्टिर्दृढधर्माऽयं, सुष्ठु जागरितो निशि ॥३७॥ एवं यो वर्द्धमानेन, स्तुतस्तादृशपर्षदि । विदेहे
सेत्स्यमानोऽसौ, पञ्चमाङ्ग उदीरितः ॥ ३८ ॥ स्वर्गेऽस्यायुरपि प्रोक्तं, श्रुते पल्यचतुष्टयम् । षष्ठो जिनस्तु श्रीम-
ल्लिजिनस्थाने भविष्यति ॥ ३९ ॥ ततश्च–संख्येय एव कालः स्याद्भाविषष्ठजिनोदये । तत् षष्ठजिनजीवो यः,
शङ्खोऽन्यः सेति बुध्यते ॥ ४० ॥ स्थानाङ्गवृत्तौ त्वयमेव शङ्खो भावितीर्थकृत्तया प्रोक्तस्तदाशयं न वेद्मीति ।
जीवः शङ्खस्य षष्ठोऽर्हन्, भावी देवश्रुताभिधः । भविष्यत्युदयाख्योऽर्हन्नन्दीजीवश्च सप्तमः ॥ ४१ ॥ अष्टमो-
ऽर्हन् सुनन्दस्य, जीवः पेढालसंज्ञकः । आनन्दजीवो नवमः, पोट्टिलाख्यो जिनेश्वरः ॥ ४२ ॥ दशमः शतक-

१ श्रीस्थानाङ्गवृत्तौ हि शङ्खस्य भावितीर्थकृत्त्वोक्तावपि न षष्ठजिनतयोक्तिः ततो नामान्तरेणान्यजिनपूर्वभवः स्यात् ॥

स्यात्मा, शतकीर्त्तिर्भविष्यति । शङ्खस्यायं सहचरः, पुष्कलीत्यपराह्वयः ॥ ४३ ॥ श्रीहैमवीरचरित्रे तु नवमः केकसीजीवो दशमस्तु रेवतीजीव इति दृश्यते । सुता चेटकराजस्य, सुज्येष्ठा स्वीकृतव्रता । आतापनां करोति स्म, निर्वस्त्राऽन्तरुपाश्रयम् ॥४४॥ इतः परिव्राट् पेढालो, विद्यासिद्धो गवेषयन् । विद्यादानोचितं पात्रमपश्यत्तां महासतीम् ॥४५॥ यद्यस्या ब्रह्मचारिण्याः, कुक्षिजस्तनयो भवेत् । तस्यार्हः स्यात्तदा व्याघ्रीदुग्धस्य स्वर्णपात्रवत् ॥ ४६ ॥ विचिन्त्यैवं धूमिकया, व्यामोहं विरचय्य सः । तद्योनावक्षिपद्बीजं, क्रमाज्जातश्च दारकः ॥४७॥ सह मात्राऽन्यदा सोऽगाज्जिनाभ्यर्णं तदा जिनम् । विद्याभृत्कालसन्दीपः, को मां हन्तेति पृष्टवान् ? ॥ ४८ ॥ स्वामिनोक्ते सत्यकिनि, तमुपेत्य जहास सः । मारयिष्यसि मां त्वं रे, इत्युक्त्वाऽपातयत् पदोः ॥ ४९ ॥ अपहृत्यान्यदा साध्वीसकाशाज्जनकेन सः । समग्रा ग्राहितो विद्या, धीरः साधयति स्म ताः ॥ ५० ॥ रोहिण्या विद्यया व्यापादितो जन्मसु पञ्चसु । षष्ठे जन्मनि षण्मासायुषा तुष्टाऽपि नादृता ॥ ५१ ॥ प्राग्जन्मसाधनात्तुष्टा, भवेऽस्मिन् सप्तमे च सा । ललाटे विवरं कृत्वा, हृदि तस्य विवेश च ॥ ५२ ॥ ललाटविवरं त्वक्षि, जातं दिव्यानुभावतः । जघान कालसन्दीपं, सपेंढालं च दाम्भिकम् ॥ ५३ ॥ प्राप्तो विद्याधरेन्द्रत्वं, नत्वा सर्वान् जिनेश्वरान् । नाट्यपूजां प्रभोः कृत्वा, रमते स यथासुखम् ॥ ५४ ॥ महादेव इति ख्यातो, रुद्र एकादशः स च । एकादशो जिनो भावी, सत्यकी सुव्रताभिधः ॥ ५५ ॥ द्वारकाधिपतिः कृष्णवासुदेवो महर्द्धिकः । भक्तः श्रीनेमिनाथस्य, सद्धर्मः श्रावकोऽभवत् ॥ ५६ ॥ अष्टादश सहस्राणि, वन्दमानोऽन्यदा मुनीन् । स वन्दनेन

शंखवृत्तं भाविजिनाः

२०

२५

॥ ५५४ ॥

२७

गुरुणा, सम्यक्त्वं क्षायिकं दधौ ॥ ५७ ॥ सप्तमक्षितियोग्यानि, दुष्कृतान्यपवर्त्तयन्। चक्रे तृतीयक्ष्माहार्णि, तीर्थकृन्नाम चार्जयत् ॥ ५८ ॥ तथोक्तं—"तित्थयरत्तं सम्मत्त खाइयं सत्तमीइ तइयाए । वंदणएणं विहिणा बद्धं च दसारसीहेण ॥ ५९ ॥" कृष्णजीवोऽममाख्यः स, द्वादशो भविता जिनः। सुरासुरनराधीशप्रणतक्रमपङ्कजः ॥ ६० ॥ वसुदेवहिण्डौ तु "कण्हो तइयपुढवीओ उव्वट्टित्ता भारहे वासे सयदुवारे नयरे पत्तमंडलियभावो पव्वज्जं पडिवज्जिय तित्थयरनामं प(उ)वज्जित्ता वेमाणिए उववज्जित्ता दुवालसमो अममनामतित्थयरो भविस्सइ" इत्युक्तमिति ज्ञेयं ॥ बलदेवस्य जीवोऽर्हन्, निष्कषायस्त्रयोदशः। कृष्णाग्रजः कृष्णतीर्थे, सेत्स्यतीत्यन्य एव सः ॥६१॥ 'भवसिद्धिओ य भयवं सिज्झिस्सइ कण्हतित्थंमि।' इत्यावश्यकनिर्युक्तिवचनात्। श्रीनेमिचरित्रेऽपि—'गच्छन्त्यवश्यं तेऽधस्तात्'; त्वं गामी वालुकप्रभाम्। श्रुत्वेति कृष्णो सद्योऽपि, नितान्तं विधुरोऽभवत्॥६२॥ भूयोऽभ्यधत्त सर्वज्ञो, मा विषीद जनार्दन!। तत उद्धृत्य मर्त्यस्त्वं, भावी वैमानिकस्ततः ॥ ६३ ॥ उत्सर्पिण्यां प्रसर्पन्त्यां, शतद्वारपुरेशितुः। जितशत्रोः सुतोऽर्हस्त्वं, द्वादशो नामतोऽममः ॥६४॥ ब्रह्मलोकं बलो गामी, मर्त्त्यो भावी ततश्च्युतः। ततोऽपि देवतश्च्युत्वा, भाव्यत्र भरते पुमान् ॥ ६५ ॥ उत्सर्पिण्यां प्रसर्पन्त्याममममाख्यस्य केशव!। तीर्थनाथस्य ते तीर्थे, स मोक्षमुपयास्यति ॥ ६६ ॥ भावी जीवश्च रोहिण्या, निष्पुलाकश्चतुर्दशः। जिनो वृजिनहृद्देवनरदेवनतक्रमः ॥ ६७ ॥ पुरे राजगृहेऽथासीत्प्रसेनजिन्महीपतेः । नागाख्यो रथिकस्तस्य, प्रेयसी सुलसाभिधा ॥ ६८ ॥ तया सुतार्थी स्वपतिरिंद्रादीन् मानयन् सुरान्। अन्यां परिणयेत्युक्तो, न मेनेऽ-

त्यन्ततन्मनाः ॥ ६९ ॥ तस्याः सम्यक्त्वविषयां, प्रशंसां शक्रनिर्मिताम्। अश्रद्दधत्सुरः कोऽपि, मुनिरूपः समेत्य ताम् ॥ ७० ॥ ऊचे तव गृहे लक्षपाकं तैलं यदस्ति तत्। दीयतां भिषजोक्तं मे, ततः सा मुमुदे भृशम् ॥७१॥ आहरन्त्याश्च तत्पूर्णं, भग्नं देवेन भाजनम्। एकं द्वितीयं तृतीयं, नाखिद्यत तथाऽप्यसौ ॥७२॥ ततस्तुष्टेन देवेन, द्वात्रिंशद्गुटिका ददे। आसां प्रभावाद् द्वात्रिंशद्, भवितारः सुतास्तव ॥७३॥ प्रयोजनेऽहं स्मर्त्तव्य, इत्युक्त्वा स तिरोदधौ। सर्वाभिरेकः पुत्रोऽस्त्वित्याजहे गुटिकास्त्वसौ ॥ ७४ ॥ द्वात्रिंशत्यथ गर्भेषु, कुर्वत्सु जठरव्यथाम्। स्मृतः स देवश्चक्रे द्राक्, स्वास्थ्यं सा सुषुवे सुतान् ॥ ७५ ॥ सा चेयं सुलसा पञ्चदशोऽर्हन्निर्ममाभिधः। षोडशो रेवतीजीवश्चित्रगुप्तो भविष्यति ॥ ७६ ॥ तथाहि—गोशालमुक्तया तेजोलेश्यया कृशिताङ्गकः। अन्येद्युर्मेंढिकग्रामे, श्रीवीरः समवासरत् ॥ ७७ ॥ अभूत्सलोहितं वर्चस्ततो वार्त्ता जनेऽभवत्। गोशालकतपस्तेजोदग्धोऽर्हन् मृत्युमेष्यति ॥ ७८॥ तत् श्रुत्वा सिंहनामानमनगारं महारवैः। रुदन्तं प्रभुराहूयेत्येवं स्माह कृपानिधिः ॥ ७९ ॥ त्वया किं खिद्यते नाहं, मरिष्याम्यधुना भुवि ?। विहृत्याब्दान् पञ्चदशाध्यर्द्धान् गन्ताऽस्मि निर्वृतिम् ॥ ८० ॥ किं च त्वं गच्छ नगरे, रेवतीश्राविकागृहे। द्वे कूष्माण्डफले ये च, मदर्थं संस्कृते तया ॥८१॥ ताभ्यां नार्थः किन्तु बीजपूरपाकः कृतस्तया। स्वकृते तं च निर्दोषमेषणीयं समाहर ॥ ८२ ॥ ततश्च मुनिना तेन, याचिता रेवती मुदा। कृतार्थं मन्यमाना स्वं, ददौ तस्मै तदौषधम् ॥ ८३॥ भगवानपि नीरागमनास्तदुदरेऽक्षिपत्। तत्क्षणात् क्षीणरोगोऽभूत्, संघः सर्वश्च पिप्रिये ॥८४॥ अर्जितानेकसुकृत-

२०

२५

२८

सञ्चया रेवती तु सा । षोडशस्तीर्थकृद्भावी, चित्रगुप्तोऽभिधानतः ॥ ८५ ॥ गवालिजीवः समाधिर्भावी सप्त-
दशो जिनः । संवराख्योऽष्टादशोऽर्हन्, भावी जीवश्च गागलेः ॥ ८६ ॥ एकोनविंशतितमो, जीवो द्वीपायनस्य
च । यशोधराख्यस्तीर्थेशो, भविता भवितारकः ॥८७॥ जिनोऽथ विंशतितमः, कर्णजीवो भविष्यति । जीवोऽर्ह-
न्नारदस्यैकविंशो मल्लजिनेश्वरः ॥८८॥ विद्याधरः श्रावकोऽभूत्, परिव्राडम्बडाभिधः । सोऽन्यदा देशनां श्रुत्वा,
वर्द्धमानजिनेशितुः ॥ ८९ ॥ गच्छन् राजगृहं चम्पानगर्याः प्रभुणोदितः । सुलसाया मम क्षेमकिंवदन्तीं निरू- ५
पयेः ॥९०॥ इति स्थानाङ्गवृत्तौ, क्वचिद्धर्मलाभमवीवददिति श्रूयते ॥ अम्बडोऽचिन्तयत्पुण्यवतीयं सुलसा सती ।
संदेशं संदिशत्येवं, यस्यै श्रीत्रिजगद्गुरुः ॥ ९१ ॥ करोम्यस्याः परीक्षां च, गुणस्तस्याः क ईदृशः ? । ध्यात्वेति
गत्वा तेनोचे, परिव्राड्वेषधारिणा ॥ ९२ ॥ भक्त्या मे भोजनं देहि, धर्मस्ते भविता महान् । ततो जगाद सा
शुद्धसम्यक्त्वैकदृढाशया ॥९३॥ प्रदत्ते भोजने येभ्यो, धर्मः सञ्जायते महान् । विदिता एव ते भ्रातः !, साधवो
विजितेन्द्रियाः ॥ ९४ ॥ सोऽन्तरिक्षे ततः पद्मासनासीनो जनान् बहून् । विस्मापयामास मासतपस्वीति जना- १०
र्चितः ॥ ९५ ॥ लोकः पप्रच्छ भगवंस्तपःपारणयाऽनया । पावयिष्यसि कं धन्यं ?, स प्राह सुलसामिति ॥९६॥
दिष्ट्या तव गृहे भाग्यैस्तपस्वी पारयिष्यति । सुलसोक्ता जनैरूचे, किं नः पाखण्डिकैरिति ? ॥ ९७ ॥ अम्ब-
डोऽपि तदाकर्ण्याचिन्तयद्युक्तमादिशत् । संदेशं जिनराजोऽस्यै, यस्याः सम्यक्त्वमीदृशम् ॥९८॥ ततः परिवृतः
पौरैरुपेत्य सुलसागृहे । एनां प्रोक्तासंदेशः, प्रशशंस मुहुर्मुहुः ॥ ९९ ॥ भविष्यत्यम्बडः सोऽयं, द्वाविंशो १४

देवतीर्थकृत्। त्रयोविंशोऽनन्तवीर्यो, जीवो द्वारम(यो नार)दस्य सः ॥४००॥ यस्त्वम्बडो महाविदेहे सेत्स्यन्नौपपातिकेऽभिहितः सोऽन्य एव सम्भाव्यत इति स्थानाङ्गवृत्तौ ॥ चतुर्विंशः स्वातिजीवो, भद्रकृन्नाम तीर्थकृत्। भविष्यति चतुर्थारस्यादौ श्रीवृषभोपमः ॥ १ ॥ अयं भाविजिननामक्रमः श्रीवीरचरित्रोद्धृतपद्यबद्धदीवालीकल्पानुसारेण, श्रीजिनप्रभसूरिकृतप्राकृतगद्यदीवालीकल्पाभिप्रायस्त्वेवं—तइओ उदाइजीवो सुपासो, चउत्थो पोट्टिलजीवो सयंपभो, पंचमो दढाउजीवो सव्वाणुभूई, छट्ठो कत्तियजीवो देवसुओ, सत्तमो संखजीवो उदओ, अट्ठमो आणंदजीवो पेढालो, नवमो सुनंदजीवो पुट्टिलो, दसमो सयगजीवो सयकित्ती, इगारसमो देवईजीवो मुणिसुव्वओ, बारसमो कण्हजीवो अममो, तेरसमो सच्चईजीवो निक्कसाओ, चउदसमो बलदेवजीवो निप्पुलाओ, पन्नरसमो सुलसाजीवो निम्ममो, सोलसमो रोहिणीजीवो चित्तगुत्तो, केई भणंति—"कक्किपुत्तो सित्तुंजे उद्धारं करित्ता जिणभवणमंडियं पुहविं काउं अजियतित्थयरनामो सग्गं गंतुं चित्तगुत्तो जिणवरो होही, इत्थ य बहुसुयमयं पमाणं, सत्तरसमो रेवईजीवो समाही, अट्ठारसमो सयलजीवो संवरो, तेवीसइमो अरजीवो अणंतविरिओ, चउवीसइमो वुद्धजीवो भद्दंकरो" उक्तशेषाः प्राग्वत्, अत्र तृतीयो य उदायी उक्तः स तु स्थानाङ्गसूत्रोक्तवीरशासननिबद्धतीर्थकृन्नामनवजीवान्तःपाती कोणिकपुत्रः यः कोणिकेऽपक्रान्ते पाडलिपुत्रं नगरं न्यवीविशत् यश्च स्वभवने पर्वदिनेषु सद्गुरूनाहूय परमसंविग्नः पौषधाद्यन्वतिष्ठत्, एकदा च देशनिर्धाटितरिपुराजपुत्रेण द्वादशवार्षिकद्रव्यसाधुना अभव्येन पौषधिकः कङ्कायःकर्त्तिकया कण्ठकर्त्तनेन

२०

२५

॥५५६॥

२८

विनाशितः सोऽयमिति, समवायाङ्गसूत्रे तु—महापउमे १ सुरादेवे २, सुपासे य ३ सयंपभे ४ । सव्वाणुभूती ५ अरहा, देवगुत्ते ६ जिणुत्तमे ॥ २ ॥ उदए ७ पेढालपुत्ते य ८, पोट्टिले ९ सतएति य १० । मुणिसुव्वते य अरहा ११, सव्वभावविदू जिणे ॥ ३ ॥ अममे १२ णिक्कसाए य १३, णिप्पुलाए य १४ निम्ममे १५। चित्तगुत्ते १६ समाही य १७, आगमेस्साए होक्खई ॥ ४ ॥ संवरे १८ अणिअट्टी य १९, विजए २० विमलेति य २१ । देवोववाए २२ अरहा, अणंतविरिए २३ भद्देति य २४ ॥ ५॥ इति नामक्रमो दृश्यते, तेषां पूर्वभवनामान्यपि तत्रैवेत्थं दृश्यन्ते—"सेणिअ १ सुपास २ उदए ३ पोट्टिल अणगार ४ तह दढाऊ ५ अ । कत्तिअ ६ संखे अ ७ तहा नंद ८ सुनंदे ९ अ सयए अ १० ॥ १ ॥ बोद्धव्वा देवई चेव ११ सच्चइ १२ तह वासुदेव १३ बलदेवे १४ । रोहिणी १५ सुलसा १६ चेव तत्तो खलु रेवती १७ चेव ॥ २ ॥ तत्तो हवइ सयाली १८ बोद्धव्वे खलु तहा भयाली य १९ । दीवायणे अ २० कण्हो २१ तत्तो खलु नारए चेव २२ ॥ ३ ॥ अंबडे अ २३ तहा साई-बुद्धे (चरमे) अ २४ होइ बोद्धव्वे। उस्सप्पिणि आगमेस्साए तित्थयराणं तु पुव्वभवा ॥४॥" इति, प्रवचनसारोद्धारेऽप्येवं दृश्यते, किं चात्र वासुदेवजीवस्त्रयोदशजिनः प्रोक्तः, अंतकृत्सूत्रे तु द्वादशस्तदुक्तं—"आगमेस्साए उस्सप्पिणीए पुंडेसु जणवएसु सतदुवारे नयरे बारसमो अममो णाम अरहा भविस्सइ"त्ति, अत्र द्वादशतीर्थकरोत्पत्तिः साधिकषोडशाब्धिव्यतिक्रमे स्यात्, विमलजिनस्थानीयत्वात्तस्य, ईयांश्च कालो नारकभवाद्यैश्चतुर्भिर्भवैः पूर्वोक्तैः सुपूरः स्यात्, त्रयोदशजिनस्तु वासुपूज्यस्थानीयः, तदुत्पत्तिस्तु साधिकषट्चत्वारिंशद-

ऽधिव्यतिक्रमे, तावान् कालस्तु पूर्वोक्तैर्भवैर्दुष्पूरो वासुदेवजीवस्येति ध्येयं ॥ अत्र चैतेषां पक्षाणां विसंवादे बहुश्रुताः सर्वविदो वा प्रमाणमिति ज्ञेयं ॥ ये च नोक्ता व्यतिकरा, जिनानां भाविनामिह । केचित्तेऽत्यन्तविदिताः, केचिच्चाविदिता इति ॥ ६ ॥ दीर्घदन्तो १ गूढदन्तः २, शुद्धदन्तस्तृतीयकः ३ । श्रीदन्त ४ श्रीभूति ५-सोमाः ६, पद्मः ७ सप्तमचक्रभृत् ॥ ७ ॥ महापद्मश्च ८ दशमः ९, चक्री च विमलाभिधः १० ॥ विमलवाहनो ११ रिष्टो १२, भाविनश्चक्रवर्त्तिनः ॥ ८ ॥ इति पद्यदीवालीकल्पकालसप्ततिकयोः, किंतु दीवालीकल्पे श्रीदन्तस्थाने श्रीचन्द्रो दृश्यते, पूर्वोक्तप्राकृतदीवालीकल्पे तु अष्टमो नायको नवमो महापद्म उक्तः, शेषाः प्राग्वत्, समवायाङ्गे तु—भरहे य १ दीहदंते २, गूढदंते य ३ सुद्धदंते य ४ । सिरिगुत्ते य ५ सिरिभूई ६, सिरिसोमे य ७ सत्तमे ॥ १ ॥ पउमे य ८ महापउमे ९, विमलवाहणे १० विपुलवाहणे ११ चेव । रिट्ठे १२ बारसमे वुत्ते, आगमेस्साण होक्खति ॥ २ ॥ नन्दिश्च १ नन्दिमित्रश्च २, तथा सुन्दरबाहुकः ३ । महाबाहु ४ रतिबलो ५, महाबल ६-बलाभिधौ ७ ॥१॥ द्विपृष्ठश्च ८ त्रिपृष्ठश्च ९, वासुदेवा अमी नव । उत्सर्पिण्यां भविष्यन्त्यां, भविष्यन्ति महर्द्धिकाः ॥ २ ॥ इति पद्यदीवालीकल्पकालसप्ततिकयोः, प्राकृतदीवालीकल्पे तु—सुन्दरबाहुरित्यत्र सुन्दरो बाहुश्चेति द्वावुक्तौ त्रिपृष्ठश्च नोक्त इति, शेषं प्राग्वदिति ॥ "नंदे य १ नंदिमित्ते य २, दीहबाहू ३ तहा महाबाहू ४ । अतिबल ५ महब्बले ६ बलभद्दे य ७ सत्तमे ॥ १ ॥ दुविट्ठू य ८ तिविट्ठू ९ आगमिस्साण विण्हुणो ।" इति समवायाङ्गे ॥

भाविनश्चक्रिणो वासुदेवाश्च

२०

२५

॥५५७॥

२७

१ अत्रान्यत्रापि नामभेदे संज्ञाभेदः, अनेकनामत्वादनेकेषां, द्वादशत्रयोदशसमाधानं तु पूर्वानुपूर्वीपश्चानुपूर्वीविलोकने न दुष्करं ।

रामा वलो १ वैजयन्तो २ऽजितो ३ धर्मश्च ४ सुप्रभः ५। सुदर्शनः ६ स्यादानन्दो, ७ नन्दनः ८ पद्म ९ इत्यपि ॥ १ ॥ इति प्रागुक्तग्रन्थयोः, प्राकृतदीवालीकल्पे तु—आद्यो वैजयन्तो नवमः संकर्षणाख्यः, शेषं प्राग्वत् ॥ जयंत १ विजए २ भद्दे ३, सप्पभे य ४ सुदंसणे ५। आणंदे ६ णंद ७ पउमे ८, संकरिसणे य ९ अपच्छिमे ॥ १ ॥ इति तु समवायाङ्गे ॥ तिलको १ लोहजङ्घश्च २, वज्रजङ्घश्च ३ केसरी ४। बलि ५ प्रह्लादनामानौ ६, तथा स्यादपराजितः ७ ॥ ९ ॥ भीमः ८ सुग्रीव ९ इति च, भाविनः प्रतिकेशवाः। इहापि समवायाङ्गे बलिर्नास्ति, सप्तमो भीमोऽष्टमो महाभीमश्चेति दृश्यते ॥ उत्सर्पिण्यां भविष्यन्तः, शलाकापुरुषा अमी ॥ १० ॥ एकषष्टि- र्भाविनोऽमी, अरकेऽत्र तृतीयके। शलाकापुरुषौ च द्वौ, चतुर्थेऽरे भविष्यतः ॥ ११ ॥

अथ प्रकृतं–सिद्धे जिने चतुर्विंशे, चक्रिणि द्वादशे मृते। संख्येयपूर्वलक्षाणि, धर्मनीती प्रवर्त्स्यतः ॥ १२ ॥ यदुक्तं प्रवचनसारोद्धारे—"उस्सप्पिणि अंतिमजिण तित्थं सिरिरिसहनाहपज्जाया। संखिज्जा जावइया तावयमाणं धुवं भविही ॥ १ ॥" इह तीर्थप्रवृत्तिकालमानमिदमुक्तं, नीतिरपि पञ्चमारकपर्यन्त इव धर्मं यावदेव स्थास्यतीति सम्भाव्यते ॥ क्रमात्कालानुभावेन, स्वल्पस्वल्पकषायकाः। नापराधं करिष्यन्ति, मनुष्या भद्रका- शयाः ॥ १३ ॥ शास्तारोऽपि प्रयोक्ष्यन्ते, न सौम्या दण्डमुल्बणम्। अभावादपराधानां, नापि दण्डप्रयोजनम् ॥ १४ ॥ तेषामल्पापराधानां, दण्डनीतिप्रवर्त्तकाः। चक्रिवंश्याः कुलकराः, क्रमात्त्रिःपञ्च भाविनः ॥ १५ ॥ तेषां हाकारमाकारधिक्कारा दण्डनीतयः। पञ्चानां प्रथमानां स्युस्तिस्रो मन्त्वनुसारतः ॥ १६ ॥ द्वितीयानां च

द्वे नीत्यौ, स्यातामन्त्यविवर्जिते । तृतीयानां च पञ्चानां, हाकार एव केवलम् ॥ १७ ॥ एवं कुलकरेष्वेषु, व्यतिक्रान्तेषु कालतः । जनाः सर्वेऽहमिन्द्रत्वं, प्रपत्स्यन्ते पराऽवशाः ॥ १८ ॥ स्वत एव प्रवर्त्तन्ते, ते न्यायेष्वेव मानवाः । न ते शासितुमर्हन्ति, तेषां शास्ता न कश्चन ॥ १९ ॥ एवं चात्रावसर्पिणीप्रातिलोम्यौचित्येनोत्सर्पिणीषु चतुर्थारकस्यादौ चतुर्विंशतितमजिननिर्वाणानन्तरं पञ्चदश कुलकरा उक्ताः, परमेतन्निर्णेतुं न शक्यते यदुत्सर्पिण्यां द्वितीयारकपर्यन्ते कुलकरा भवन्ति उत चतुर्थारकस्यादौ भवन्ति, यत एष निर्णयो ह्यनन्तरभविष्यदुत्सर्पिण्यनुसारेण कर्त्तुं शक्यते, भविष्यदुत्सर्पिण्यां च कुलकरानाश्रित्य शास्त्रे भूयान् विसंवादो दृश्यते, तथाहि—कालसप्ततिकादीपालिकाकल्पादिषु च द्वितीयारकपर्यन्ते विमलवाहनादयः सप्त कुलकरा उक्ताः, स्थानाङ्गे तु सप्तमे स्थानके सप्त कुलकरा उक्ताः, तत्र सुमतिनामापि नोक्तं, दशमे तु सीमङ्करादयो दशोक्तास्तत्र सुमतिनामोक्तं, परं प्रान्ते न, समवायाङ्गे तु सप्त तथैव, दश तु विमलवाहनादयः सुमतिपर्यन्ता उक्ताः, स्थानांगनवमस्थानके च सुमतिपुत्रत्वेन पद्मनाभोत्पत्तिरुक्ता, तथा जम्बूद्वीपप्रज्ञप्तिसूत्रे च द्वितीयारके कुलकरा मूलत एव नोक्ताः, चतुर्थारके तु एकस्मिन् पक्षे मूलत उक्ताः, पक्षान्तरे च पञ्चदशोक्तास्तथाहि—"जा चेव ओसप्पिणीए पच्छिमे तिभागे वत्तव्वया सा भाणियव्वा कुलगरवज्जा उसभसामिवज्जा, अण्णे पढंति–तीसे णं समाए पढमे तिभाए इमे पण्णरस कुलगरा समुप्पज्जिस्संति, तंजहा—सुमइ जाव उसभे, सेसं तं चेव, दंडनीईओ पडिलोमाओ णेयव्वाओ" अत्र च ऋषभनामा कुलकरो, न तु ऋषभस्वामिनामा तीर्थकृदिति

उत्सर्पिण्यां कुलकर वक्तव्यता

२०

२५

॥५५८॥

२८

तद्वृत्तौ ॥ एवं च कुलकरानाश्रित्य दुष्षमाकालानुभावाद्वाचनाभेदजनितेषु उत्सर्पिणीकालभाविकुलकराणां भिन्नभिन्ननामताव्यस्तनामतान्यूनाधिकनामताभिन्नारकभाविताभिधायकेषु शास्त्रवाक्येषु सत्सु तत्त्वं सर्वविद्वेद्यमिति ज्ञेयं ।

अथ प्रकृतं—क्रमेणात्यन्तसारस्याद्युच्छिन्ने पावके सति । अग्निपक्वान्नाशनादिस्थितिर्विच्छेत्स्यतेऽखिला ॥ २० ॥ क्रीडिष्यन्ति यथेच्छं ते, प्रादुर्भूतैरनुक्रमात् । कल्पद्रुमैर्दशविधैः, पूर्यमाणमनोरथाः ॥ २१ ॥ पञ्चचापशतोत्तुङ्गाः, स्युर्नित्यमशनार्थिनः । उत्कर्षतः पूर्वकोट्यायुषोऽत्र प्रथमं जनाः ॥ २२ ॥ एकपल्योपमोत्कृष्टायुषः क्रोशोच्चभूघनाः । चतुर्थभक्तभोक्तारः, पर्यन्ते ते च भाविनः ॥ २३ ॥ प्रवर्द्धमानपर्याये, पूर्णे तुर्येऽरके क्रमात् । सुषमानाम सुखकृत्, पञ्चमारः प्रवेक्ष्यति ॥ २४ ॥ एकक्रोशोच्छ्रिता एकपल्योपमपरायुषः । तत्रैकाहान्तराहारा, भाविनः प्रथमं जनाः ॥ २५ ॥ द्विक्रोशोच्चाश्च पर्यन्ते, द्विपल्यपरमायुषः । षष्ठभक्तकृताहारा, भविष्यन्ति नरोत्तमाः ॥ २६ ॥ अरके पञ्चमे पूर्णेऽथैवं पर्यायवृद्धितः । षष्ठोऽरकोऽथ सुषमसुषमाख्यः प्रवेक्ष्यति ॥ २७ ॥ द्विक्रोशतुङ्गाश्चात्रादौ, द्विपल्योत्कृष्टजीविताः । द्विदिनान्तरभोक्तारो, भाविनो भुवि युग्मिनः ॥ २८ ॥ अन्ते क्रोशत्रयोत्तुङ्गास्त्रिपल्यपरमायुषः । भवितारो युगलिनस्त्रिदिनान्तरभोजिनः ॥ २९ ॥ उत्कृष्टं ह्यरकप्रान्ते,

१ उत्सर्पिण्यामाद्यारकेऽराजकता स्पष्टैव, द्वितीयारकान्त्यभागे राज्यव्यवस्थाऽत आवश्यकी, युक्तास्तत्र कुलकराः, तुर्यारकादिभागे तु तत्तद्दण्डविसर्जकत्वेन ते, उक्तानुक्ती तु विवक्षाधीने ।

युग्मिनामुच्छ्रयादिकम् । तेभ्यः पूर्वेषां तु तेषां, किञ्चिदूनोनमेव तत् ॥ ३० ॥ एवं पंशुलिकादीनां, वृद्धिरप्यूह्यतां स्वयम् । कल्पवृक्षादिभावानां, पर्यायाणां च भूयसाम् ॥ ३१ ॥ एवं पूर्णे कालचक्रे, पुनरप्यवसर्पिणी । पुनरुत्सर्पिणीत्येवं, कालचक्रं पुनः पुनः ॥ ३२ ॥ उन्नमच्च विनमच्च सन्ततं, पारिणामिकगुणेन सङ्गतम् । चक्रमेतदसकृद् विवर्त्तयन्, क्रीडतीव भुवि कालबालकः ॥३३॥ (रथोद्धता) विश्वाश्चर्यदकीर्त्तिकीर्तिविजयश्रीवाचकेन्द्रान्तिषद्राजश्रीतनयोऽतनिष्ट विनयः श्रीतेजपालात्मजः । काव्यं यत्किल तत्र निश्चितजगत्तत्त्वप्रदीपोपमे, सर्गः प्रापदशेषतां परिमितश्चारुश्चतुस्त्रिंशता ॥ ४३४ ॥

इति श्रीलोकप्रकाशे चतुस्त्रिंशत्तमः सर्गः समाप्तः ॥ श्रीरस्तु ॥

॥ अथ श्रीकाललोकप्रकाशे पंचत्रिंशत्तमः सर्गः प्रारभ्यते ॥

स्यात्पुद्गलपरावर्त्तः, कालचक्रैरनन्तकैः । द्रव्यक्षेत्रकालभावभेदात्स च चतुर्विधः ॥ १ ॥ एकैकश्च भवेद् द्वेधा, सूक्ष्मबादरभेदतः । अष्टानामप्यथैतेषां, स्वरूपं किञ्चिदुच्यते ॥ २ ॥ औदारिकवैक्रियाङ्गाहारकतैजसोचिताः । भाषोच्छ्वासमनःकर्मयोग्याश्चेत्यष्ट वर्गणाः ॥ ३ ॥ सजातीयपुद्गलानां, समूहो वर्गणोच्यते । मौक्तिकानां मिथस्तुल्यगुणानामिव राशयः ॥ ४ ॥ कुचिकर्णो यथा नानावर्णासंख्येयधेनुकः । चक्रे गवां सवर्णानां, समु- ५
दायान् पृथक् पृथक् ॥ ५ ॥ तथा कृते चाभूवंस्ताः, सुज्ञानाः सुग्रहा यथा । तथा तीर्थङ्करोद्दिष्टाः, पुद्गलवर्गणा अपि ॥ ६ ॥ तथाहि—एकाकिनः सन्ति लोके, येऽनन्ताः परमाणवः । एकाकित्वेन तुल्यानां, तेषामेकाऽत्र वर्गणा ॥ ७ ॥ द्व्यणुकानामनन्तानां, द्वितीया वर्गणा भवेत् । त्र्यणुकानामनन्तानां, तृतीया किल वर्गणा ॥ ८ ॥ यावदेवमनन्तानां, गण्यप्रदेशशालिनाम् । स्कन्धानां वर्गणा गण्या, द्व्यणुकत्वादिजातिभिः ॥ ९ ॥ असंख्येयप्रदेशानामप्येकैकाणुवृद्धितः । असंख्येया वर्गणाः स्युः, प्राग्वज्जातिविवक्षया ॥ १० ॥ तथाऽनन्ता- १०
णुजातानां, स्कन्धानामपि वर्गणाः । भवन्त्येकैकाणुवृद्ध्याऽनन्ता इति जिनैः स्मृतम् ॥ ११ ॥ अत्यल्पाणुमयत्वेन, स्थूलत्वादखिला अपि । ग्रहे नायान्ति जीवानां, ग्रहणानुचिता इति ॥ १२ ॥ अथोल्लङ्घ्याखिला एताः, सिद्धानन्तांशसंमितैः । अभव्येभ्योऽनन्तगुणैः, परमाणुभिरुद्धतैः ॥ १३ ॥ स्कन्धैर्याः स्युः समारब्धा, वर्गणा १३

विस्रसावशात् । जघन्या ग्रहणार्हाः स्युस्ताः किलौदारिकोचिताः ॥ १४ ॥ आभ्यश्चैकैकाणुवृद्धा, मध्यमा ग्रहणोचिताः । तावद् ज्ञेया यावदौदारिकार्होत्कृष्टवर्गणाः ॥ १५ ॥ उत्कृष्टौदारिकार्हाभ्यश्चैकेनाप्यणुनाऽधिकाः । भवन्ति पुनरप्यौदारिकानर्हा जघन्यतः ॥ १६ ॥ ततश्चैकैकाणुवृद्धा, अनर्हा मध्यमा बुधैः । तावद् ज्ञेया पुनर्यावद्, उत्कृष्टाः स्युरनर्हकाः ॥ १७ ॥ एता बह्वणुनिष्पन्नत्वात्सूक्ष्माः परिणामतः । तत औदारिकानर्हाः, स्थूलस्कन्धोद्भवं हि तत् ॥ १८ ॥ यथा यथाऽणुभूयस्त्वं, परिणामस्तथा तथा । स्कन्धेषु सूक्ष्मः स्यात्तेषामल्पत्वे स्थूल दृष्यते ॥ १९ ॥ औदारिकापेक्षयैव, किलैताः प्रचुराणुकाः । स्युः सूक्ष्मपरिणामाश्च, वैक्रियापेक्षया पुनः ॥२०॥ स्वल्पाणुजातत्वात्स्थूलपरिणामा अमूस्ततः । वैक्रियानुचिताः सूक्ष्मस्कन्धोत्थं प्रोच्यते हि तत् ॥ २१ ॥ उत्कृष्टौदारिकानर्हा, यास्ता एकाणुनाऽधिकाः । जघन्या वैक्रियार्हाः स्युस्ततो द्व्याद्यणुभिर्युताः ॥ २२ ॥ मध्यमा वैक्रियार्हाः स्युस्तदर्होत्कृष्टकावधि । जघन्यमध्यमोत्कृष्टा, वैक्रियानुचितास्ततः ॥ २३ ॥ वैक्रियापेक्षया भूयोऽणुकाः सूक्ष्मा अमूः किल । आहारकापेक्षया च, स्थूलाः स्तोकाणुका इति ॥ २४ ॥ एवमग्रेऽपि भाव्यं ॥ जघन्यमध्यमोत्कृष्टास्तत आहारकोचिताः । तदनर्हास्ततस्त्रेधा, ततश्च तैजसोचिताः ॥ २५ ॥ ततस्तथैव त्रिविधास्तैजसानुचितास्ततः । त्रेधा भाषोचिता भाषानुचिताश्च ततस्त्रिधा ॥ २६ ॥ आनप्राणोचितास्त्रेधा, तदनर्हास्ततस्त्रिधा । मनोऽर्हास्तदनर्हाश्च, त्रिविधाः स्युस्ततः क्रमात् ॥ २७ ॥ जघन्यमध्यमोत्कृष्टाः, कर्मणामुचितास्ततः । भवन्ति वर्गणास्त्रेधा, याभ्यः कर्म प्रजायते ॥ २८ ॥ इतोऽप्यूर्ध्वं ध्रुवाचित्तादयो याः सन्ति वर्गणाः ।

वर्गणाष्टकं १५ २० २५ ॥५६०॥ २७

नार्थाभावात्ता इहोक्ताः, प्रोक्तास्त्वावश्यकादिषु ॥ २९ ॥ तदर्थिना च ते ग्रन्था, भावनीयाः सवृत्तयः । क्षेत्रा-
वगाहाद्युक्तानां, वर्गणानामथोच्यते ॥ ३० ॥ एता यथोत्तरं सूक्ष्मा, ज्ञेया बह्वणुका अपि । प्रथमौदारिकानर्ह-
वर्गणायाः प्रभृत्यथ ॥ ३१ ॥ सर्वा अप्यङ्गुलासङ्ख्यभागमात्रावगाहनाः । यथोत्तरं च सूक्ष्मत्वात्, स ऊनोनो
विभाव्यताम् ॥ ३२ ॥ औदारिकोचिता यावत्, क्षेत्रं स्पृशति वर्गणा । तदनर्हा ततो न्यूनं, भाव्या इत्यखिला
अपि ॥ ३३ ॥ औदारिकवैक्रियाद्यन्तरालेष्वत्र वर्गणाः । उक्ता एकैकाणुवृद्ध्याऽनर्हा या उभयोरपि ॥ ३४ ॥ ५
ताश्च सिद्धानामनन्ततमभागेन संमिताः । अभव्येभ्योऽनन्तगुणा, मानतः परिकीर्त्तिताः ॥ ३५ ॥ औदारि-
काद्यष्टकस्य, जघन्या ग्रहणोचिताः । उक्ता या वर्गणास्ताभ्य, उत्कृष्टा ग्रहणोचिताः ॥ ३६ ॥ स्वस्वानन्ततमे
भागे, यावन्तः परमाणवः । एकैकवृद्धैस्तावद्भिरधिकाः स्युः किलाणुभिः ॥ ३७ ॥ अत एवान्तराले स्युर्जघन्यो-
त्कृष्टयोस्तयोः । अनन्ता वर्गणा मध्या, एकैकाणुविशेषिताः ॥ ३८ ॥ सर्वाः परिणमन्त्येताः, वर्गणा विस्रसा
वशात् । यथास्वमुपयुज्यन्ते, ततश्चौदारिकादिषु ॥ ३९ ॥ अयोग्याः स्युः पुनर्योग्याः, योग्याः पुनरयोग्यकाः । १०
परिणामपरावर्त्ताद्विवर्त्तन्ते हि वर्गणाः ॥ ४० ॥ औदारिकप्रभृतय, एताश्चाहारकावधि । अष्टस्पर्शाः पञ्च
वर्णा, रसगन्धद्वयान्विताः ॥ ४१ ॥ एकवर्णरसगन्धः, स्याद् द्विस्पर्शश्च यद्यपि । परमाणुस्तथाप्येते, समुदाय-
व्यपेक्षया ॥ ४२ ॥ तैजसाद्या वर्गणा अप्येवं वर्णादिभिः स्मृताः । स्पर्शतस्तु चतुःस्पर्शास्तेषां मृदुलघू ध्रुवौ
॥ ४३ ॥ अन्यौ द्वौ च स्निग्धशीतौ, स्निग्धोष्णौ वा प्रकीर्त्तितौ । रूक्षोष्णौ रूक्षशीतौ वा, विज्ञैर्वेद्यौ यथाग- १४

मम् ॥ ४४ ॥ अयं पञ्चसंग्रहवृत्तिशतकबृहट्टीकाद्यभिप्रायः, कर्मप्रकृतिप्रज्ञप्त्याद्यभिप्रायेण त्वेतासु स्निग्धोष्ण-रूक्षशीतरूपमेव स्पर्शचतुष्टयं स्यान्नान्यदिति ।

सर्वलोकगतान् सर्वानणूनेकोऽसुमानिह । औदारिकादिसप्तकत्वेन स्वीकृत्य मुञ्चति ॥ ४५ ॥ कालेन यावता कालस्तावानुक्तो जिनेश्वरैः । द्रव्यतः पुद्गलपरावर्त्तो बादर आगमे ॥ ४६ ॥ आहारकाङ्गभावेन, स्वीकृत्योत्सर्जनं पुनः । न संभवेत् समाणूनां, मितवारं हि तद्भवेत् ॥४७॥ सप्तानामथ चौदारिकादीनां मध्यतः पुनः । भावेनैकेनैव चौदारिकाङ्गत्वादिनाऽसुमान् ॥ ४८ ॥ सर्वान् परिणमय्याणूनेक एव विमुञ्चति । कालेन यावता तावान्, द्रव्यतः सूक्ष्म इष्यते ॥४९॥ सर्वस्य लोकाकाशस्य, प्रदेशा निरनुक्रमम् । स्पृश्यन्ते मरणैः सर्वे, जीवेनैकेन यावता ॥ ५० ॥ तावान् कालो बादरः स्यात्, क्षेत्रतः पुद्गलोऽत्र च । खांशा अपूर्वस्पृष्टास्ते, गण्याः स्पृष्टचरास्तु न ॥ ५१ ॥ यस्मिन् विवक्षिते व्योमप्रदेशे स्यान्मृतोऽसुमान् । पुनस्तद्व्यवहितप्रदेशे म्रियतेऽथ सः ॥ ५२ ॥ कालान्तरे पुनरपि, तृतीये तदनन्तरे । म्रियते गण्यते सैष, प्रदेशः खलु लेख्यके ॥ ५३ ॥ एवं लोकाभ्रप्रदेशैः, सर्वैरपि यथाक्रमम् । जीवेन मृत्युना स्पृष्टैः, सूक्ष्मोऽसौ क्षेत्रतो भवेत् ॥ ५४ ॥ खप्रदेशे व्यवहिते, एकद्व्यादिप्रदेशकैः । भवेद्यन्मरणं तच्च, गण्यते नात्र लेख्यके ॥ ५५ ॥ जीवो यद्यप्यसंख्येयान्, खां-

२०

२५

२६

१ स्पर्शनेन्द्रियग्राह्याणां गुरुलघुत्वमृदुकर्कशानामभावात् एवं, प्राक्तु पुद्गलस्वरूपापेक्षयोक्तं, तत्पक्षे गुरुत्वलघुत्वयोर्मृदुत्वकर्कशत्वयोः परस्परपरिहारेणावस्थानात् एकतरावस्थाननियमात्, चतुःस्पर्शताऽपि व्यवहार्यलघुत्वादेरभावात्, प्रोक्तवत् स्निग्धशीतादि तु न नियतं, परिणमनाद्वा तथेति

शान् जघन्यतोऽपि हि । अवगाह्यैव म्रियते, संख्येयान्न तु कर्हिचित् ॥ ५६ ॥ तथाऽत्राप्यवधीभूत, एक एव विवक्ष्यते । नभःप्रदेशो मरणस्पृष्टोऽन्येऽस्पृष्टका इति ॥ ५७ ॥ कालचक्रस्य समयैर्निखिलैर्निरनुक्रमम् । मरणेनाङ्गिना स्पृष्टैः, कालतो बादरो भवेत् ॥ ५८ ॥ कालचक्रस्य कस्यापि, म्रियते प्रथमक्षणे । अन्यस्य कालचक्रस्य, द्वितीयसमयेऽसुमान् ॥ ५९ ॥ तृतीयस्य पुनः कालचक्रस्यैव तृतीयके । समये म्रियते दैवात्तदैवायुःक्षये सति ॥ ६० ॥ कालचक्रस्य समयैः, सर्वैरेवं यथाक्रमम् । मरणेनाङ्गिना स्पृष्टैः, सूक्ष्मः स्यादेष कालतः ॥ ६१ ॥ यत्र चाद्यद्वितीयादिक्षणक्रममतीत्य च । मरणं स्यात्कालचक्रं, लेख्यके तन्न गण्यते ॥ ६२ ॥ भावतः पुद्गलपरावर्त्तं सूक्ष्मं तथापरम् । उपदेष्टुं यथाशास्त्रं, वक्तव्यान्तरमुच्यते ॥ ६३ ॥ एकस्मिन् समये जीवा, ये पृथ्वीकायिकादयः । प्रविशन्त्यवशाः कर्मनुन्नाः सूक्ष्माग्निकायिषु ॥६४॥ लोकाकाशप्रमाणानां, खखण्डानां महीयसाम् । असंख्यानां खप्रदेशैः, प्रमितास्तेऽङ्गिनः स्मृताः ॥ ६५ ॥ ये पुनः पूर्वमुत्पन्नास्तेजस्कायतयाऽङ्गिनः । पुनर्विपद्योत्पद्यन्ते, स्वकायेष्वेव कर्मभिः ॥ ६६ ॥ ते पूर्वोद्दिष्टसूक्ष्माग्निप्रविशज्जीवराशिषु । न लेख्यके समायान्ति, ते हि पूर्वप्रविष्टकाः ॥ ६७ ॥ एकक्षणप्रविशद्भ्य, एभ्यः सूक्ष्माग्निकायिकाः । पूर्वप्रविष्टा ये ते स्युरसंख्येयगुणाधिकाः ॥ ६८ ॥ यतो जघन्यतोऽप्येतेऽन्तर्मुहूर्त्तायुषोऽङ्गिनः । प्रतिक्षणं चासंख्येया, उत्पद्यन्ते नवा नवाः ॥ ६९ ॥ तेभ्यः कायस्थितिस्तेषामसंख्येयगुणाधिका । एकैकस्य ह्यसंख्येयकालचक्राणि सा गुरुः ॥ ७० ॥ ततोऽप्यस्या अनुभागबन्धस्थानानि तानि च । असंख्येयगुणानि स्युः, संयमस्थानकानि च ॥ ७१ ॥ कायस्थितौ

ह्येकैकस्यां, स्थितिबन्धा असंख्यशः । यथा जघन्यतः कायस्थितिरन्तर्मुहूर्त्तिका ॥ ७२ ॥ ततः परैकसमयाधिकाऽन्या द्विक्षणाधिका । त्रिक्षणाभ्यधिका यावदुत्कृष्टा सर्वतोऽन्तिमा ॥ ७३ ॥ एकैकस्मिन्ननुभागबन्धस्थानान्यसंख्यशः । स्थितिबन्धे भवन्तीति, निर्दिष्टं तत्त्ववेदिभिः ॥ ७४ ॥ तथाहुः—"एगसमयंमि लोए, सुहुमगणिजिआ उ जे उ पविसंति। ते हुंतऽसंखलोगप्पएसतुल्ला असंखिज्जा ॥७५॥ तत्तो असंखगुणिया अगणिकाया उ तेसि कायठिई। तत्तो संजमअणुभागठाणाणिऽसंखगुणिआणि ॥७६॥" एवं च प्रवचनसारोद्धारसूत्रवृत्त्याद्यभिप्रायेण सूक्ष्माग्निकायिकजीवकायस्थितेरनुभागबन्धस्थानानि भावपुद्गलपरावर्त्तनिरूपणायोपक्रान्तानि, पञ्चसंग्रहकर्मग्रन्थसूत्रवृत्त्यादिषु तु सामान्यत एवानुभागबन्धस्थानान्युक्तानि, तथाहि—"भावपुद्गलपरावर्त्तमाह—अणुभागट्ठाणेसुं, अणंतरपरंपराविभत्तेहिं। भावंमि बायरो सो सुहुमो सव्वेसऽणुक्कमसो ॥ १ ॥" इति पञ्चसंग्रहे। अथात्रानुभागबन्धस्थानस्वरूपनिरूपणायोपक्रम्यते—प्राग् यानि कर्मयोग्यानि, द्रव्याण्युक्तानि तान्यथ । स्वाधिष्ठिताभ्रप्रदेशावगाढानीह चेतनः ॥७७॥ उपादाय कर्मतया, द्राक् परिणमयत्ययम् । किंचित्साधर्म्यतो वह्निदृष्टान्तोऽत्र निरूप्यते ॥ ७८ ॥ यथा दहनयोग्यानि, द्रव्याणि ज्वलनोऽपि हि । स्वगोचरस्थितान्येव, प्रापयेद्वह्निरूपताम् ॥ ७९ ॥ न तु स्वविषयातीतान्यग्नितां नेतुमीश्वरः । जीवोऽपि स्वप्रदेशेभ्यो, द्रव्यमेवं बहिः स्थितम् ॥ ८० ॥ नैव कर्मयोग्यमपि, कर्मतां नेतुमीश्वरः । गृह्णाति तानि जीवश्च, सर्वैरात्मप्रदेशकैः ॥ ८१ ॥

२०

२५

२७

तथाहि—जीवप्रदेशाः सर्वेऽपि, शृङ्खलावयवा इव । स्युः परस्परसंबद्धाः, प्रतीका वपुषीव वा ॥ ८२ ॥ एकस्मिन्नपि तज्जीवप्रदेशे व्यापृते सति । सर्वेऽपि व्याप्रियन्तेऽन्ये, ग्रहीतुं कर्मणां दलम् ॥ ८३ ॥ यथा घटाद्युपादातुं, कराग्रे व्यापृते सति । मणिबन्धकूर्परांसादयोऽप्यवयवाः परे ॥ ८४ ॥ व्याप्रियन्ते मन्दमन्दतरमन्दतमं ध्रुवम् । एवं सर्वात्मप्रदेशव्यापारः कर्मसंग्रहे ॥८५॥ युग्मम् ॥ इदं च कर्मद्रव्याणां, ग्रहणं सादि भाव्यताम् । तद्द्रव्यदेशकालाद्यैः, स्यादनादि प्रवाहतः ॥ ८६ ॥

एषां च कर्मद्रव्याणां, भागप्राप्तिर्यथा भवेत् । एकेनाध्यवसायेन, गृहीतानां तथोच्यते ॥ ८७ ॥ क्रमान्महत्तरो भागो, महास्थितिककर्मणाम् । एवं स्थित्यनुसारेण, भागोऽष्टास्वपि कर्मसु ॥८८॥ आयुषस्तत्र सर्वेभ्यः, स्तोको भागो भवेदिह । सर्वेभ्योऽल्पस्थितिकत्वाद्विशेषाभ्यधिकस्ततः ॥ ८९ ॥ कर्मांशानां भवेद्भागः, कर्मणोर्नामगोत्रयोः । परस्परापेक्षया तु, द्वयोः स्यादेतयोस्समः ॥ ९० ॥ ज्ञानदर्शनावरणान्तरायाणां बृहत्तमः । भागः स्यान्नामगोत्राभ्यां, त्रयाणां च मिथः समः ॥९१॥ तेभ्योऽपि मोहनीयस्य, भवेद्भागो बृहत्तमः । न्याय्यो महास्थितेरस्य, महतां ह्यखिलं महत् ॥ ९२ ॥ वेदनीयस्य भागः स्यान्मोहादल्पस्थितेरपि । सर्वेभ्योऽपि महीयान् यत्, तत्र हेतुर्निशम्यताम् ॥ ९३ ॥ भागेऽल्पे वेदनीयस्य, स्फुटत्वं सुखदुःखयोः । नानुभावयितुं शक्तमिदं तादृक्स्वभावतः ॥ ९४ ॥ वेदनीयं च भवति, प्रभूतदलिकं यदि । तदा स्वफलभूते ते, सुखदुःखे स्फुटात्मके ॥ ९५ ॥ ईष्टे व्यक्त्या दर्शयितुं, नान्यथेत्यंशकल्पना । एकाध्यवसायोपात्तकर्मद्रव्येषु भाव्यताम् ॥ ९६ ॥

५ १० १४

स चैकोऽध्यवसायः स्यान्नानावैचित्र्यभाजनम्। अस्मिन्नेकस्वरूपे हि, भवेत्कर्मापि तादृशम् ॥ ९७ ॥ विना कारणभेदं हि, कार्यभेदो न संभवेत्। कर्मवैचित्र्यबीजस्य, तदस्यापि विचित्रता ॥ ९८ ॥ अयं विचित्रतागर्भोऽध्यवसायः स्वयं व्रजेत्। संक्लेशं वा विशुद्धिं वा, तादृक्सामग्र्यपेक्षया ॥ ९९ ॥ सामग्री च द्रव्यक्षेत्रकालभावात्मिका तथा। संक्लिष्टो वा विशुद्धो वाऽध्यवसायः शरीरिणाम् ॥ १०० ॥ कदाप्यष्टविधे बन्धे, हेतुर्भवति कर्हिचित्। सप्तविधे षड्विधे च, कदाऽप्येकविधेऽपि सः ॥ १ ॥ उक्तं च—"कहं एगज्झवसायगहियं दलियं अट्ठविहाइबंधत्ताए परिणमइ ?, उच्यते—तस्स अज्झवसाणमेव तारिसं जेण अट्ठविहाइबंधत्ताए परिणमइ, जहा कुंभगारो मिउपिंडेण सरावाईणि परिणामेइ, तस्स जारिसो परिणामो तेणं परिणामेणं संजुत्तस्स दलियं अट्ठविहाइत्ताए परिणमइ" प्राग्वच्च रचनांशानां, सप्तषड्विधबन्धयोः। सर्वत्र वेदनीयांशो, ज्येष्ठोऽन्येषां यथास्थिति ॥ २ ॥ यदा त्वेकं वेदनीयं, कर्म बध्नात्यसौ तदा। सर्वं योगवशोपात्तं, दलं तस्यैव भाव्यताम् ॥ ३ ॥ तथोक्तं पञ्चसंग्रहे—"जं समयं जावइयाइं बंधए ताण एरिसविहीए। पत्तेयं पत्तेयं भागे निव्वत्तए जीवो ॥ ४ ॥" बध्नाति मूलप्रकृतीर्यथाऽल्पाल्पास्तथा तथा। प्रदेशबन्धमुत्कृष्टं, कुरुतेऽल्पिष्टमन्यथा ॥ ५ ॥ न्याय्यमेतच्च खण्डादेर्यथांशः प्राप्यते महान्। विभाजकेषु स्तोकेषु, तेषु भूयस्सु चाल्पकः ॥ ६ ॥ आहुश्च—"जह जह य अप्पपगईण बंधगो तह तहत्ति उक्कोसे। कुणई पएसबंधं जहन्नयं तस्स वच्चासे ॥ ७ ॥" इह पूर्वं कर्मयोग्यवर्गणावर्त्तिनोऽणवः। स्वाभाविकरसाढ्याः स्युर्हेतवः सर्वकर्मणाम् ॥ ८ ॥ यदा तु जीवैर्गृह्यन्ते, तदैतेषु किला-

२०

२५

२८

णुषु । कषायाध्यवसायेन, ग्रहणक्षण एव ते ॥ ९ ॥ अविभागपरिच्छेदा, रससंबन्धिनोऽमिताः । प्रादुर्भवन्ति सर्वेभ्यो, जीवेभ्योऽनन्तसंगुणाः ॥ १० ॥ विविधाश्च स्वभावाः स्युर्ज्ञानावारकतादयः । जीवानां पुद्गलानां चाचिन्त्यशक्तिकता यतः ॥ ११ ॥ यथा शुष्कतृणादीनां, पूर्वं ये परमाणवः । प्रायेणैकस्वरूपाः स्युः, स्वाभाविकरसास्तथा ॥ १२ ॥ गवादिभिर्गृहीतास्ते, क्षीरादिरसरूपताम् । सप्तधातुपरीणामाद्यान्ति चानेकरूपताम्॥१३॥ तथैकाध्यवसायास्तेष्वपि कर्मदलाणुषु । रसोद्भेदोऽनन्तभेदो, भवेत्तद्दर्श्यते स्फुटम् ॥ १४ ॥ तथाहि–अभव्येभ्योऽनन्तगुणैः, सिद्धानन्तांशसंमितैः । निष्पन्नानणुभिः स्कन्धानात्माऽऽदत्ते प्रतिक्षणम् ॥१५॥ अविभागपरिच्छेदान्, करोत्येषु रसस्य च । सर्वजीवानंतगुणान्, प्रत्येकं परमाणुषु ॥ १६ ॥ योऽर्द्धार्द्धेन छिद्यमानो, रसांशः सर्वविद्धिया । न दत्तेऽंशं सोऽविभागपरिच्छेद इह स्मृतः ॥ १७ ॥ तत्रैकसमयोपात्ते, कर्मस्कन्धेऽत्र येऽणवः । सर्वाल्पिष्ठरसाश्छिद्यमानास्तेऽपि रसांशकैः ॥१८॥ सर्वजीवानन्तगुणान्, प्रयच्छन्ति रसांशकान् । एषां चाल्पर-साणूनां, निचयो वर्गणाऽऽदिमा ॥१९॥ अन्यासां वक्ष्यमाणानां, वर्गणानामपेक्षया । स्युर्भूयांसोऽणवोऽत्राल्परसा हि वहवोऽणवः ॥ २० ॥ रसाविभागभागेन, तत एकेन येऽधिकाः । द्वितीया वर्गणा तेषामणूनामिह कीर्त्तिता ॥ २१ ॥ इयं च वर्गणा हीना, परमाणुव्यपेक्षया । आद्याया वर्गणाया यदेते तेभ्यो रसाधिकाः ॥ २२ ॥ रसाविभागभागस्येत्येकैकस्य प्रवृद्धितः । वर्गणाः परमाणूनां, तावद्वाच्या मनीषिभिः ॥ २३ ॥ भवन्ति वर्गणा यावत्सिद्धानन्तांशसंमिताः । अभव्येभ्योऽनन्तगुणास्ता रसांशविशेषिताः ॥ २४ ॥ रसभागांश्च यच्छन्ति,

५

१०

१४

सर्वान्त्यवर्गणाणवः। सर्वाद्यवर्गणाणुभ्यः, किलानन्तगुणाधिकान् ॥ २५ ॥ राशिश्चासां वर्गणानां, स्पर्द्धकं प्रथमं भवेत्। समूहो हि वर्गणानामिह स्पर्द्धकमुच्यते ॥ २६ ॥ एकैकेन रसांशेन, वृद्धाश्च परमाणवः। अथै- तस्मान्न लभ्यन्ते, प्रथमस्पर्द्धकात्परम् ॥ २७ ॥ सर्वजीवानन्तगुणै, रसांशैरेव चाधिकाः। संप्राप्यन्तेऽत एवेदं, पूर्णं स्पर्द्धकमादिमम् ॥ २८ ॥ क्रमाद्रसनिरंशांशैर्वृद्धौ हि स्पर्द्धकं भवेत्। स्यादन्यस्पर्द्धकारम्भो, निरंशांशक्र- मत्रुटौ ॥ २९ ॥ आद्यस्पर्द्धकपर्यन्ताणुभ्यो येऽथ रसांशकैः। सर्वजीवानन्तगुणैः, प्रवृद्धाः परमाणवः ॥ ३० ॥ तेषां च समुदायः स्यात्, प्रथमा वर्गणा किल। द्वितीयस्य स्पर्द्धकस्य, ततः स्यात्पूर्ववत्क्रमः ॥ ३१ ॥ एकैकेन रसांशेन, प्रवृद्धैः परमाणुभिः। आरब्धा वर्गणा यावत्सिद्धानन्तांशसंमिताः ॥ ३२ ॥ एतासां वर्गणानां च, समुदायो भवेदिह। द्वितीयं स्पर्द्धकं पूर्णीभूतेऽस्मिन् स्पर्द्धके पुनः ॥ ३३ ॥ एकद्व्याद्यैः रसच्छेदैर्न प्राप्यन्तेऽ- णवोऽधिकाः। प्राप्यन्ते किं तु ते सर्वजीवानन्तगुणैर्ध्रुवम् ॥ ३४॥ अणूनां प्राग्वदेतेषां, समूहो वर्गणाऽऽदिमा। तृतीयस्य स्पर्द्धकस्य, ततः स्यात्पूर्ववत्क्रमः ॥ ३५ ॥ भवन्ति स्पर्द्धकान्येवं, प्रवृद्धानि रसांशकैः। सिद्धानन्तत- मभागतुल्यानीति जिना विदुः ॥ ३६ ॥ अनुग्रहाय शिष्याणां, दृष्टान्तोऽत्र निरूप्यते। असद्भावस्थापनया, वर्गणास्पर्द्धकानुगः ॥ ३७ ॥ आद्यस्य स्पर्द्धकस्याद्या, वर्गणा कल्प्यते यथा। रसांशशतसंयुक्तैरारब्धा परमा- णुभिः ॥ ३८ ॥ अथैकैकरसच्छेदवृद्धाणूत्थाभिरादितः। दशभिर्वर्गणाभिः स्यात्पूर्णं स्पर्द्धकमादिमम् ॥ ३९ ॥ ततो दशोत्तरशतरसांशैः परमाणुभिः। नाप्यते वर्गणारब्धा, नापि द्व्याद्यंशकाधिकैः ॥ ४० ॥ किंतु त्रिंशश-

तरसच्छेदाढ्यैः परमाणुभिः । प्राप्यते वर्गणाऽऽरब्धा, द्वितीये स्पर्द्धकेऽग्रिमा ॥४१॥ ततः पुनरपि प्राग्वद्रसैकैकलवाधिकैः । परमाणुभिरारब्धा, लभ्यन्ते खलु वर्गणाः ॥ ४२ ॥ क्रमवृद्धौ रसांशानां, समासानां समाप्यते । द्वितीयं स्पर्द्धकमिति, स्युरनन्तान्यमून्यहो ॥ ४३ ॥ रसांशवृद्धैरणुभिरारब्धाश्च यथोत्तरम् । अल्पाणुका वर्गणाः स्युः, स्थापनाऽत्र विलोक्यताम् ॥ ४४ ॥ इति प्रतिज्ञातमनुभागस्वरूपं निर्व्यूढं ।

एतेषां चानुभागानां, बन्धस्थानान्यसंख्यशः । तेषां निष्पादका येऽध्यवसायास्तेऽप्यसंख्यशः ॥ ४५ ॥ तथाहि—एकप्रादेशिकी श्रेणिर्या लोकस्य घनाकृतेः । असंख्येयतमे तस्या, भागे येऽभ्रप्रदेशकाः ॥ ४६ ॥ तावन्ति योगस्थानानि, तेभ्योऽसंख्यगुणाधिकाः । तीव्रमन्दादयो भेदा, एकैकप्रकृतेः स्मृताः ॥ ४७ ॥ प्रकृत्योरवधिज्ञानदर्शनावरणाख्ययोः । स्थुलोकानामसंख्यानां, खप्रदेशैर्मिता भिदः ॥ ४८ ॥ भेदा असंख्या एवानुपूर्वीष्वपि चतसृषु । एवं भाव्या भिदोऽसंख्याः, प्रकृतिष्वपरास्वपि ॥ ४९ ॥ तथोक्तं—"ओहिणाणावरणओहिदंसणावरणपगईओ असंखेज्जलोगागासप्पएसमित्ताओ—असंखेज्जइभागे जत्तिया आगासपएसा तत्तियाओ" एकैकस्मिन्नुक्तयोगस्थाने प्राप्यन्त एव यत् । सकला बन्धमाश्रित्य, पूर्वोक्ताः प्रकृतेर्भिदः ॥ ५० ॥ ततः प्रकृतिभेदाः प्रागसंख्येयगुणाधिकाः । योगस्थानेभ्यो यदुक्तास्तद्युक्तमुपपद्यते ॥ ५१ ॥ उक्तं च—"जोगट्ठाणेहिंतो असंखेज्जगुणाओ पगईओ, एक्केक्के जोगट्ठाणे वट्टमाणे एयाउ सव्वाउ बंधइत्तिकाउं" तेभ्यः प्रकृतिभेदेभ्यश्चासंख्येयगुणाधिकाः । स्थितिभेदा जघन्याद्या, ज्येष्ठान्ताः क्षणवृद्धितः ॥ ५२ ॥ स्थितिर्लघ्वी स्थिति-

स्थानं, प्रथमं परिकीर्तितम्। सैकक्षणा द्वितीयं सा, तृतीयं द्विक्षणाधिका ॥ ५३ ॥ इत्यादि ॥ प्रतिप्रकृतिभेदं यत्स्थितिभेदा असंख्यकाः। ततः प्रकृतिभेदेभ्यस्तेऽसंख्येयगुणा इति ॥ ५४ ॥ स्थितिबन्धाध्यवसायास्तेभ्योऽसंख्यगुणाधिकाः। एकैकस्मिन् स्थितिस्थाने, बध्यमाने हि देहिभिः ॥ ५५ ॥ तद्धेतवोऽध्यवसाया, नानाजीवव्यपेक्षया। असंख्येयलोकवियत्प्रदेशप्रमिताः स्मृताः ॥ ५६ ॥ एभ्यश्चाध्यवसायेभ्योऽप्यसंख्येयगुणानि च। जिनैर्दृष्टान्यनुभागबन्धस्थानानि कर्मसु ॥ ५७ ॥ जन्तोर्लेश्यापरिणामविशेषाः संभवन्ति ये। कषायोदयसंमिश्रास्तीव्रमन्दाद्योऽमिताः ॥ ५८ ॥ जघन्यादेकसमयस्थितिकास्ते जिनैः स्मृताः। उत्कर्षतोऽष्टसमयस्थितिकाः समवेदिभिः ॥ ५९ ॥ स्युः साधकतमास्ते चानुभागबन्धनं प्रति। ततोऽनुभागबन्धस्य, स्थानान्युच्यन्त उत्तमैः ॥ ६० ॥ एकैकस्मिन् स्थितिबन्धाध्यवसाये ह्यसंख्यशः। दृष्टाः केवलिभिर्नानानुभागबन्धहेतवः ॥६१॥ कषायमिश्रलेश्यानां, तीव्रमन्दाद्यो भिदः। स्थितिबन्धाशयेभ्यः स्युस्तदसंख्यगुणा हि ते॥ ६२ ॥ अनुभागसृजो जीवाध्यवसायाश्च ते द्विधा। कषायमिश्रलेश्यानां, परिणामात् शुभाशुभाः ॥ ६३ ॥ शुभैराधत्तेऽनुभागं, क्षीरखण्डरसोपमम्। जीवः कर्मपुद्गलानामन्यैर्निम्बरसोपमम् ॥ ६४ ॥ प्रत्येकमध्यवसाया, अशुभाश्च शुभाश्च ते। संख्यातिगानां लोकानां, प्रदेशैः प्रमिताः स्मृताः ॥६५॥ शुभा विशेषाभ्यधिकाः, केवलं कथिता जिनैः। अशुभाः किंचिदूनाः स्युर्युक्तिस्तत्र निशम्यताम् ॥६६॥ यानेव रसबन्धस्याध्यवसायान् क्रमस्थितान्। संक्लिश्यमान ऊर्ध्वोर्ध्वमारोहत्यसुमानिह ॥ ६७ ॥ विशुद्ध्यमानस्तानेवावरोहति क्रमादधः। शुभानां प्रकृ-

अध्यवसायस्थानानि

२०

२५
॥५६५॥

२८

तीनां तु, रसबन्धे विपर्ययः ॥ ६८ ॥ संक्लिश्यमानोऽवरोहेदारोहेच्छुध्यमानकः । उभये च ततस्तुल्याः, सौधसोपानपङ्क्तिवत् ॥ ६९ ॥ केवलं क्षपको येष्वध्यवसायेषु संस्थितः । क्षपकश्रेणिमारोहेत्तेभ्यो नासौ निवर्त्तते ॥ ७० ॥ क्षपकस्य ततः श्रेष्ठाध्यवसायव्यपेक्षया । ऊचिरेऽध्यवसायाः प्रागशुभेभ्योऽधिकाः शुभाः ॥ ७१ ॥ एभ्योऽनुभागबन्धस्य, स्थानेभ्योऽनन्तसंगुणाः । एकाध्यवसायोपात्ताः, कर्माहंदलिकाणवः ॥ ७२ ॥ तेभ्योऽप्यनन्तगुणिताः, कर्माणुषु रसांशकाः। तच्च भावितमेव प्राक्, वर्गणास्पर्द्धकोक्तिभिः ॥७३॥ तथोक्तं पञ्चसंग्रहे—"सेढिअसंखेज्जंसे जोगट्ठाणा तओ असंखिज्जा । पगडीभेया तत्तो ठिइभेया होंति तत्तोऽवि ॥ ७४ ॥ ठिइबंधज्झवसाया तत्तो अणुभागबंधठाणाणि । तत्तो कम्मपएसाणंतगुणा तो रसच्छेया ॥ ७५ ॥"

अथ प्रकृतं—जीवोऽनुभागबन्धाध्यवसायस्थानकान्यथ । मरणेन स्पृशत्येकः, सर्वाणि निरनुक्रमम् ॥ ७६ ॥ कालेन यावता कालस्तावान् केवलिनोदितः । भावतः पुद्गलपरावर्त्तो बादर आगमे ॥ ७७ ॥ एतान्येव स्पृशत्येकः, क्रमात्कालेन यावता । भावतः पुद्गलपरावर्त्तः सूक्ष्मश्च तावता ॥७८॥ अयं भावः—कश्चित्सर्वजघन्येऽङ्गी, यः कषायोदयात्मके । वर्त्तमानोऽध्यवसायस्थाने प्राप्तो मृतिं ततः ॥ ७९ ॥ भूयसाऽपि हि कालेन, स एवाङ्गी द्वितीयके । आद्यात्परेऽध्यवसायस्थानके म्रियते यदि ॥ ८० ॥ तदेव मरणं तस्य, गण्यते लेख्यके बुधैः । नान्यान्युत्क्रमभावीनि, तान्यनन्तान्यपि स्फुटम् ॥ ८१ ॥ कालान्तरे चेद्भूयोऽपि, द्वितीयस्मादनन्तरे । तृतीये म्रियते सोऽध्यवसायस्थानके स्थितः ॥ ८२ ॥ तदा तृतीयं मरणं, गण्यते तस्य लेख्यके । त्यक्तक्रमाणि शेषाणि,

नानन्तान्यपि तान्यहो ॥ ८३ ॥ एवं क्रमेण सर्वाणि, तानि कालेन यावता । स्पृश्यन्ते म्रियमाणेन, तेन संसारवारिधौ ॥ ८४ ॥ तावान् कालः स्यादनन्तकालचक्रमितो महान् । भावतः पुद्गलपरावर्त्तः सूक्ष्मो जिनोदितः ॥ ८५ ॥ क्षेत्रतः पुद्गलपरावर्त्तो यः सूक्ष्म ईरितः । उपयोगी मार्गणायां, स एवाद्रियते श्रुते ॥ ८६ ॥ तथोक्तं जीवाभिगमसूत्रे सान्तमिथ्यादृष्टिस्थितिनिरूपणाधिकारे—"जे से साइए सपज्जवसिए मिच्छद्दिट्ठी से जहण्णेणं अंतोमुहुत्तं, उक्कोसेणं अणंताओ ओसप्पिणिउस्सप्पिणिओ कालओ, खेत्तओ अवड्ढं पोग्गलपरियट्टं देसूण"मित्यादि, येऽन्ये च पुद्गलपरावर्त्ताः ससात्र दर्शिताः । ते स्युः प्ररूपणामात्रं, न क्वाप्येषां प्रयोजनम् ॥ ८७ ॥ बादरेषु चतुर्ष्वेषु, दर्शितेषु यथाविधि । भवन्ति सुगमाः सूक्ष्मा, इत्येवैषां प्रयोजनम् ॥ ८८ ॥ नन्वत्र पुद्गलपरावर्त्तोऽणूनां दशान्तरम् । तद्द्रव्यपुद्गलपरावर्त्त एवास्ति नापरे ॥ ८९ ॥ तत्कथं पुद्गलपरावर्त्तशब्दः प्रवर्त्तते । क्षेत्रकालादिभेदेषु, ब्रूमहे श्रूयतामिह ॥ ९० ॥ परावर्त्तः पुद्गलानां, शब्दव्युत्पत्तिकारणम् । प्रवृत्तिहेतुस्त्वनन्तकालचक्रप्रमाणता ॥ ९१ ॥ द्वावर्थधर्मौ भजतः, शब्दसंबन्धहेतुताम् । शब्दव्युत्पादकः शब्दप्रवृत्तिजनकोऽपि च ॥ ९२ ॥ यो गच्छति स गौरत्र, शब्दव्युत्पत्तिकृद्गतिः । शृङ्गसास्लादिमत्त्वं तु, स्वार्थे शब्दप्रवृत्तिकृत् ॥ ९३ ॥ व्युत्पत्तिहेतुसत्त्वेऽपि, प्रवृत्तिहेत्वभावतः । गच्छत्यपि गजाश्वादौ, गोशब्दो न प्रवर्त्तते ॥९४॥ व्युत्पत्तिहेत्वभावेऽपि, गत्यभावात् स्थिते गवि । प्रवृत्तिहेतुसद्भावात्, गोशब्दोऽसौ प्रवर्त्तते ॥ ९५ ॥ तथा क्षेत्रादिभेदेषु, शब्द एष प्रवर्त्तते । व्युत्पत्तिहेत्वभावेऽपि, प्रवृत्तेर्हेतुयोगतः ॥९६॥ एतच्च पुद्गलपरावर्त्तस्वरूपं प्रायः

पञ्चसंग्रहकर्मग्रन्थप्रवचनसारोद्धारसूत्रवृत्त्याद्यनुसारेण प्रोक्तं, श्रीभगवतीसूत्रद्वादशशतकचतुर्थोद्देशकवृत्तौ तु–"औदारिकार्हद्रव्याणि, सर्वाण्यप्येकदेहिना। अनुभूय विमुच्यन्ते, औदारिकवपुष्टया ॥ ९७ ॥ कालेन यावता तावान्, भवत्यौदारिकाभिधः। पुद्गलानां परावर्त्त, इत्युक्तं तत्त्वदर्शिभिः ॥ ९८ ॥ भाव्याः शेषाः षडप्येवं, विबुधैर्वैक्रियादयः। आहारकशरीरार्हपुद्गलानां त्वसंभवी ॥ ९९ ॥ प्रत्येकमेते चानन्तकालचक्रमिता मताः। पुद्गलानामनन्तत्वादेकत्वाद् ग्राहकस्य च ॥२००॥ अतीताश्च भवन्त्येतेऽनन्ताः सर्वशरीरिणाम्। भविष्यन्तश्च भाव्यन्तां, पूर्वोक्तेन्द्रिययुक्तिवत् ॥ १ ॥ सा चैवं–न भवन्त्येव केषांचित्, केषांचिच्च भवन्ति ते। एकद्वित्र्यादिसंख्येयासंख्यानंता यथाभवम् ॥ २ ॥ कार्मणस्तैजसश्चौदारिकानप्राणसंभवौ। मानसो वाचिकश्चाथ, वैक्रियश्चेत्यनुक्रमात् ॥ ३ ॥ यथोत्तरं कालतोऽमी, सप्तानन्तगुणाधिकाः। उपपत्तिं वदन्त्येवं, तत्र प्राचीनसूरयः ॥ ४ ॥ सूक्ष्मत्वात्कार्मणाणूनां, ग्रहणाच्च प्रतिक्षणम्। अचिरेण समाप्यन्ते, ते तत्कालस्ततोऽल्पकः ॥ ५ ॥ तैजसाः पुद्गलाः स्थूलाः, कार्मणापेक्षया ततः। कालोऽस्य भूयानल्पं हि, गृह्यते स्थूलमेकदा ॥ ६ ॥ सर्षपबदरन्यायादिति शेषः। औदारिकाणां स्थूलत्वादश्वद्ग्रहणादपि। भूयान् कालोऽस्य ते ग्राह्या, यदौदारिकदेहिना ॥ ७ ॥ आनप्राणाणवः सूक्ष्मा, यद्यप्येभ्यस्तथापि ते। पर्याप्तैरेव गृह्यन्ते, तत्कालोऽस्य ततो बहुः ॥ ८ ॥ सूक्ष्मत्वेऽपि मनःपुद्गलानां स्याद्भूरिकालता। एकाक्षादिमहाकायस्थितौ तेषामनादृतेः ॥ ९ ॥

१ सर्वौदारिकपरिणमनकाले अन्यासामपि वर्गणानां विपरिणामेन तथाभावमपेक्ष्य सदृशमुभयमपि

भाषा द्व्यक्षाद्यवस्थायां, यद्यप्यस्ति तथाप्यसौ। भृशं स्थूला मनोऽणुभ्यस्तदत्रानल्पकालता ॥ १० ॥ भूयिष्ठ-काललभ्यत्वाद्वैक्रियाङ्गस्य सर्वतः। वैक्रियः पुद्गलपरावर्तोऽनन्तगुणाधिकः ॥११॥ पश्चानुपूर्व्या सप्तामी, भूरि-भूरितराः स्मृताः। जीवस्य दीर्घकालीनाः, स्तोकाः स्युर्बहवः परे ॥१२॥ इत्याद्यधिकं भगवतीवृत्तितो १ श० उ० ३-ऽवसेयं॥ एवं वर्णितरूपपुद्गलपरावर्त्तैरनन्तैर्मितस्त्रैलोक्याखिलवस्तुवृन्दविदुरैः कालो व्यतीत स्मृतः। एतस्माच्च भवेदनन्तगुणितः कालः किलानागतोऽनादिः सान्त इहादिमस्तदपरोऽनन्तः सहादिः पुनः ॥ १३ ॥ (शार्दूल०) तथाहुः—"उस्सप्पिणी अनंता पुग्गलपरियट्टओ मुणेयव्वो। तेऽणंता तीयद्धा अणागयद्धा अणंतगुणा ॥ १ ॥" यत्पञ्चमाङ्गे गदितं त्वनागते, काले व्यतीतात्समयाधिकत्वम्। आनन्त्यसाम्यादुभयोरनागते, तद्वर्त्तमानक्ष-णसंगतेश्च ॥ १४ ॥ (रथोद्धता) एवं च—अतीतकालादिह सर्वकालः, क्षणाधिकः स्याद् द्विगुणस्तथैव। कालो व्यतीतोऽपि च सर्वकालाज्जिनैः प्रणीतः समयोनमर्द्धम् ॥ १५ ॥ कालोऽखिलोऽनागतकालतः स्यात्, पूर्वोक्त-युक्त्या द्विगुणः क्षणोनः। क्षणाधिकार्द्धं किल सर्वकालात्, कालो भविष्यन् भवतीति सिद्धम् ॥१६॥ तथोक्तं—'अणागतद्धाणं तीतद्धाणं समयाहिया, तीतद्धाणं अणागतद्धातो समयूणा' अत्र वृत्तिः—अतीतानागतौ कालावनादित्वानन्तत्वाभ्यां समानौ, तयोश्च मध्ये भगवतः प्रश्नसमयो वर्त्तते, स चाविनष्टत्वेनातीते न प्रवि-शति इत्यविनष्टत्वसाधर्म्यादनागते क्षिप्तः, ततः समयातिरिक्ताऽनागताद्धा भवति, इह कश्चिदाह—अतीताद्धा-तोऽनागताद्धाऽनन्तगुणा, अत एवानन्तेनापि कालेन गतेन नासौ क्षीयते इत्यत्रोच्यते—इह समत्वमुभयो-

रप्यन्ताभावमात्रेण विवक्षितमिति भगवती श० २५उ०५। शिष्टोपदिष्टार्थवचोगरिष्ठः, क्षणाद्यनेकात्मविधावरिष्टः। स्वहेतुतोज्जीवितसर्वलोको, दिष्ट्या समाप्तः किल दिष्टलोकः ॥१७॥ विश्वाश्चर्यदकीर्त्तिकीर्त्तिविजयश्रीवाचकेन्द्रान्तिषद्राजश्रीतनयोऽतनिष्ट विनयः श्रीतेजपालात्मजः। काव्यं यत्किल तत्र निश्चितजगत्तत्त्वप्रदीपोपमे, पञ्चत्रिंश इहैव पूर्तिमगमत् सर्गो निसर्गोज्ज्वलः ॥ २१८ ॥ ३५ ॥

इति महोपाध्यायश्रीविनयविजयगणिविरचिते श्रीलोकप्रकाशे
पंचत्रिंशत्तमः सर्गः समाप्तः
तत्समाप्तौ समाप्तोऽयं दिष्ट(काल)लोकः

इति श्रीविनयविजयोपाध्यायविरचिते

श्रीलोकप्रकाशे दिष्ट(काल)लोकः समाप्तः । सर्गाः ३५

॥ अथ श्रीभावलोकप्रकाशे षट्त्रिंशत्तमः सर्गः प्रारभ्यते ॥

शङ्खेश्वरं प्रणिदधे प्रकटप्रभावं, त्रैलोक्यभावनिवहावगमस्वभावम् । भावारिवारणहरिं हरिसेवनीयं, वामेयमीश्वरममेयमहोनिधानम् ॥ १ ॥ स्वरूपं भावलोकस्य, यथाऽऽगममथ ब्रुवे । गुरुश्रीकीर्त्तिविजयदीपोद्योतितहृद्गृहः ॥ २ ॥ स्वतस्तैस्तैर्हेतुभिर्वा, तत्तद्रूपतयाऽऽत्मनाम् । भवनान्यौपशमिकादयो भावाः स्मृता इति ॥ ३ ॥ भवन्त्यमीभिः पर्यायैर्यद्वोपशमनादिभिः । जीवानामित्यमी भावास्ते च षोढा प्रकीर्त्तिताः ॥ ४ ॥ आद्यस्तत्रौपशमिको, द्वितीयः क्षायिकाह्वयः । क्षायोपशमिको भावस्तार्तीयीको निरूपितः ॥ ५ ॥ तुर्य औदयिको भावः, पञ्चमः पारिणामिकः । द्व्यादिसंयोगनिष्पन्नः, षष्ठः स्यात्सान्निपातिकः ॥ ६ ॥ यः प्रदेशविपाकाभ्यां, कर्मणामुदयोऽस्य यत् । विष्कम्भणं स एवौपशमिकस्तेन वा कृतः ॥ ७ ॥ क्षयः स्यात्कर्मणामात्यन्तिकोच्छेदः स एव यः । अथवा तेन निर्वृत्तो, यः स क्षायिक इष्यते ॥ ८ ॥ अभावः समुदीर्णस्य, क्षयोऽथोपशमः पुनः । विष्कंभितोदयत्वं यदनुदीर्णस्य कर्मणः ॥ ९ ॥ आभ्यामुभाभ्यां निर्वृत्तः, क्षायोपशमिकाभिधः । भावस्तृतीयो निर्दिष्टः, ख्यातोऽसौ मिश्र इत्यपि ॥ १० ॥ उदयावलिकायां यत्, प्रविष्टं क्षीणमेव तत् । तदन्यत्तु भवेत्कर्म, शेषमत्रोपशान्तिमत् ॥ ११ ॥ वह्नेर्विध्यातशेषस्य, भस्मच्छन्नस्य साम्यभृत् । क्षीणोपशान्तं स्यात्कर्मेत्यवस्थाद्वितयान्वितम् ॥ १२ ॥ नन्वौपशमिकाद्भावो, भिद्यते नैष कर्म यत् । तत्रापि क्षीणमुदितमुपशान्तं भवेत्परम्

५

१०

१३

॥ १३ ॥ अत्रोच्यते–स्यात् क्षयोपशमे कर्मप्रदेशानुभवात्मकः । उदयोऽप्यनुभागं तु, नैषां वेदयते मनाक्
॥ १४ ॥ प्रदेशैरप्युपशमे, कर्मणामुदयोऽस्ति न । विशेषोऽयमुपशमक्षयोपशमयोः स्मृतः ॥ १५ ॥ आगम-
श्चात्र–"से णूणं भंते! णेरइयस्स वा तिरिक्खजोणियस्स वा मणुस्सस्स वा देवस्स वा जे कडे कम्मे अत्थि णं
तस्स अवेयइत्ता मोक्खो ?, हंता गो० !, से केणट्ठेणं भंते! एवं वुच्चति?, एवं खलु गो० ! मए दुविहे कम्मे
पन्नत्ते, तं०–पदेसकम्मे य अणुभावकम्मे य, तत्थ णं जं पदेसकम्मं तं नियमा वेदेइ, तत्थ णं जं तं अणुभा-
वकम्मं तं अत्थेगतियं वेदेति, अत्थेगतियं नो वेदेति, णातमेयं अरहता, विण्णायमेतं अरहता, अयं
जीवे इमं कम्मं अब्भोवगमियाए वेदणाए वेदिस्सति, अयं जीवे इमं कम्मं उवक्कमियाए वेदणाए वेदिस्सति,
अहाकम्मं अहानिकरणं जहा जहा तं भगवया दिट्ठं तहा तहा विपरिणमिस्सतीति, से तेणट्ठेणं एवं वुच्चति"
यः कर्मणां विपाकेनानुभवः सोदयो भवेत् । स एवौदयिको भावो, निर्वृत्तस्तेन वा तथा ॥ १६ ॥ य एव
जीवाजीवानां, स्वरूपानुभवं प्रति । प्रह्वीभावः परीणामः, स एव पारिणामिकः ॥ १७॥ परिणामेन निर्वृत्त, इति
चात्र न संभवेत् । अस्यां निरुक्तौ सादित्वं, जीवत्वादेः प्रसज्यते ॥ १८ ॥ अत्र चाद्यास्त्रयः प्रादुर्भवेयुः कर्म-
घाततः । रजोऽभ्रविगमे तिग्मरश्मिकान्तिकलापवत् ॥१९॥ सर्वतो देशतश्चेति, विघातः कर्मणां द्विधा । आद्यः
स्ववीर्यापेक्षोऽन्यः, सकर्मात्मप्रयोगजः ॥२०॥ तुर्यस्तु भावः स्वोपात्तकर्मोदयसमुद्भवः । सुरामदोदयाद्गीतनृत्त-
हास्यादिभाववत् ॥ २१ ॥ पारिणामिकभावस्तु, निर्दिष्टो निर्निमित्तकः । अत एव स्वार्थिकोऽत्र, प्रत्ययो राक्ष-

भावानां
स्वरूपं

२०

२५

२७

सादिवत् ॥ २२ ॥ आदिमाश्च त्रयो भावा, जीवानामेव निश्चिताः । अन्तिमौ तौ पुनर्जीवाजीवसाधारणौ स्मृतौ ॥ २३ ॥ एकत्र द्व्यादिभावानां, सन्निपातोऽत्र वर्त्तनम् । यो भावस्तेन निर्वृत्तः, स भवेत्सान्निपातिक- ॥२४॥ कर्मग्रन्थसूत्रवृत्तितत्त्वार्थभाष्यभावप्रकरणादिष्वयमेव भावषट्कोद्देशक्रमः, अनुयोगद्वारसूत्रमहाभाष्यः सूत्रवृत्त्यादिषु तु औदयिकौपशमिकक्षायिकक्षायोपशमिकपारिणामिकसान्निपातिका भावा इति, तत्र कर्मग्रन्था- दिसूत्रेषु यत्प्रवचनोक्तक्रमलङ्घनं तत्र लाघवं कालस्वामिभेदतारतम्यं च हेतुमामनन्ति । आंतर्मौहूर्त्तिकत्वेन, यत आद्योऽल्पकालिकः । तथाऽल्पस्वामिक इति, प्रथमं स प्ररूपितः ॥ २५ ॥ नात्राप्नुयुर्यद्द्रवः, परिणाममिहे- दृशम् । भावस्तदौपशमिको, मितस्वामिक इष्यते ॥ २६ ॥ भूरिभेदो भूरिकालो, भूरिस्वामिक एव च । क्षायि- को ह्यौपशमिकात्तदुक्तस्तदनन्तरम् ॥२७॥ क्षायोपशमिकः पश्चात्, क्षायिकात्तत एव च । एवमौदयिकः प्रोक्तः, क्षायोपशमिकादनु ॥ २८ ॥ ततो भूरिकर्मयोगात्, स्वामिसाधर्म्यतोऽपि च । युक्तं क्षायोपशमिकादन्वौदयि- कशंसनम् ॥ २९ ॥ अत्यन्तभिन्नः पूर्वेभ्यो, महाविषय एव यत् । पारिणामिक इत्युक्तो, भावादौदयिकादनु ॥ ३० ॥ पूर्वेषां द्व्यादिसंयोगादाविर्भवति यन्ननु । तद्युक्तमुदितः सर्वपर्यन्ते सान्निपातिकः ॥ ३१ ॥

द्वौ नवाष्टादशाथैकविंशतिश्च त्रयः क्रमात् । एषामुत्तरभेदाः स्युस्त्रिपञ्चाशच्च मीलिताः ॥ ३२ ॥ औ० २ क्षायि० ९ क्षायो० १८ औद० २१ पा० ३, सर्व० ५३ । सान्निपातिकभावस्तु, षड्विंशतिविधो भवेत् । तत्रोप- युक्ताः षड् भेदा, विंशतिस्त्वप्रयोजकाः ॥ ३३ ॥ सम्यक्त्वं यद्भवत्यादौ, ग्रन्थिभेदादनन्तरम् । स्याद्यचोपश-

सांनिपातिका भावप्रभेदाः

मश्रेण्यां, सम्यक्त्वं चरणं तथा ॥ ३४ ॥ द्वावौपशमिकौ भावौ, प्रोक्तावेतौ महर्षिभिः । ब्रूमहे क्षायिकस्याथ, नव भेदान् यथागमम् ॥ ३५ ॥ ये ज्ञानदर्शने स्यातां, निर्मूलावरणक्षयात् । सम्यक्त्वं यच्च सम्यक्त्वमोहनीयक्षयोद्भवम् ॥३६॥ चारित्रं यच्च चारित्रमोहनीयक्षयोत्थितम् । याश्च दानाद्यन्तरायपञ्चकक्षयसंभवाः ॥ ३७॥ दानलाभभोगवीर्योपभोगा लब्धयोऽद्भुताः । नवामी क्षायिका भावा, भवेयुः सर्ववेदिनाम् ॥ ३८ ॥ मतिश्रुतावधिमनःपर्यायाणां चतुष्टयम् । मत्यज्ञानश्रुताज्ञानविभङ्गा इति च त्रयम् ॥३९॥ यतो ज्ञानावरणीयक्षयोपशमसंभवाः । ततः क्षायोपशमिका, भावाः ससोदिता अमी ॥ ४० ॥ ज्ञानी सम्यक्त्वयोगेनाज्ञानी मिथ्यात्ववांश्च सः । क्षायोपशमिकत्वं तदज्ञानानामपि स्फुटम् ॥४१॥ अचक्षुश्चक्षुरवधिर्दर्शनानीति च त्रयम् । दर्शनावरणीयाख्यक्षयोपशमसंभवम् ॥ ४२ ॥ सम्यक्त्वं यदनन्तानुबन्धिदर्शनमोहयोः । भवेत् क्षयोपशमतः, क्षायोपशमिकं ततः ॥४३॥ यद् द्वादशकषाया[2]दिचारित्रमोहकर्मणः । भवेत् क्षयोपशमतः, क्षायोपशमिकं ततः ॥ ४४ ॥ संकल्पकृसात् प्राणातिपातादेर्यन्निवर्त्तनम् । आरम्भोत्थादनिवृत्तिः, संयमासंयमो ह्ययम् ॥ ४५ ॥ एष चारित्रमोहस्य, यत्कषायाष्टकात्मनः । भवेत्क्षयोपशमतः, क्षायोपशमिकस्ततः ॥ ४६ ॥ दानादिलब्धयः पञ्च,

२०

२५

१ संपूर्णतया समस्ता नव केवलिनामिति क्षायिकसम्यक्त्वस्यासर्ववेदिनां भवनेऽपि न क्षतिः २ आदिशब्देनात्र दर्शनमोहग्रहणे चारित्रमोहताविरोधः, नोकषायग्रहणे तु श्रेणौ क्षायोपशमिकप्रसंग इति चेन्न, क्षायोपशमिकचारित्रे संज्वलनस्यापि मान्द्यात्, तन्मान्द्यत्वे एवातिचाररहिततताभावात्, यावच्च न द्वादशं गुणस्थानं तावदस्त्येव क्षायोपशमिकचारित्रं, आदिना वा आद्याश्चारित्रमोहप्रकृतयः

छद्मस्थानां भवन्ति याः । क्षायोपशमिक्यो विघ्नक्षयोपशमजा हि ताः ॥ ४७ ॥ भावा अष्टादशाप्येवं, क्षायो-
पशमिका इमे । कर्मक्षयोपशमतो, यद्भवंत्युक्तया दिशा ॥ ४८ ॥ अथाज्ञानमसिद्धत्वमसंयम इमे त्रयः । ले-
श्याषट्कं कषायाणां, गतीनां च चतुष्टयम् ॥ ४९ ॥ वेदास्त्रयोऽथ मिथ्यात्वं, भावा इत्येकविंशतिः । कर्मणा-
मुदयाज्जातास्तत औदयिकाः स्मृताः ॥ ५० ॥ अतत्त्वे तत्त्वबुद्ध्यादिस्वरूपं भूरिदुःखदम् । मिथ्यात्वमोहोदय-
जमज्ञानं तत्र कीर्त्तितम् ॥ ५१ ॥ यदभ्यधायि-“जह दुव्वयणमवयणं कुच्छियसीलं असीलमसईए । भन्नइ
तह नाणंपि हु मिच्छदिट्ठिस्स अन्नाणं ॥ ५२ ॥” असिद्धत्वमपि ज्ञेयमष्टकर्मोदयोद्भवम् । प्रत्याख्यानावरणी-
योदयाच्च स्यादसंयमः ॥ ५३ ॥ लेश्याः कषायनिस्यन्द, इति येषां मतं मतम् । तेषां मते कषायाख्यमोहोदय-
भवा इमाः ॥ ५४ ॥ येषां मते त्वष्टकर्मपरिणामात्मिका इमाः । अष्टकर्मोदयात्तेषां, मतेऽसिद्धत्ववन्मताः
॥ ५५ ॥ येषां योगपरीणामो, लेश्या इति मतं मतम् । तेषां त्रियोगीजनककर्मोदयभवा इमाः ॥ ५६ ॥ इति
कर्मग्रन्थवृत्त्यभिप्रायः, तत्त्वार्थवृत्तौ च मनोयोगपरिणामो लेश्या इत्युक्तं, तथाहि—“ननु कर्मप्रकृतिभेदानां
द्वाविंशं शतं प्रकृतिगणनया प्रसिद्धमाम्नाये, न च तत्र लेश्याः परिपठितास्तदेतत्कथम्?, उच्यते, वक्ष्यते
नामकर्मणि मनःपर्याप्तिः, पर्याप्तिश्च करणविशेषो, येन मनोयोग्यपुद्गलानादाय चिन्तयति, ते च मन्यमानाः
पुद्गलाः सहकरणान्मनोयोग उच्यते, मनोयोगपरिणामश्च लेश्या” इति, एवं मतत्रयेऽपि यथास्वं लेश्यानाम-

५
१०
१३

न्तर्भावो वाच्यः, अत्र मतत्रयेऽन्त्यं[1] पटीयः, अन्ये चानीदृशे इत्यादि द्रव्यलोके लेश्याधिकारे प्रपञ्चितमस्ति ॥ कषायाः स्युः क्रोधमानमायालोभा इमे पुनः । कषायमोहनीयाख्यकर्मोदयसमुद्भवाः ॥ ५७ ॥ गतयो देवमनुजतिर्यग्नरकलक्षणाः । भवन्तीह गतिनामकर्मोदयसमुद्भवाः ॥ ५८ ॥ नोकषायमोहनीयोदयोद्भूता भवन्त्यथ । स्त्रीपुंनपुंसकाभिख्या, वेदाः खेदाश्रया भृशम् ॥ ५९ ॥ मिथ्यात्वमपि मिथ्यात्वमोहनीयोदयोद्गतम् । एवमौदारिका भावा, व्याख्याता एकविंशतिः ॥ ६० ॥

ननु निद्रादयो भावास्तत्तत्कर्मोदयोद्गताः । अन्येऽपि संति तत्केयं, गणनाऽत्रैकविंशतेः ? ॥ ६१ ॥ अत्रोच्यते—यथासंभवमेष्वेवान्तर्भाव्या अपरेऽपि ते । सावर्ण्यसाहचर्याभ्यामाक्षेपाद्वोपलक्षणात् ॥ ६२ ॥ निद्रापञ्चकमाक्षिप्तमज्ञानग्रहणाद्यतः । स्यादज्ञानमोहनीयावरणद्वितयोदयात् ॥ ६३ ॥ गतिग्रहणतः शेषनामकर्मभिदां व्रजः । आक्षिप्यतेऽविनाभावात्सावर्ण्याद्वोपलक्ष्यते ॥ ६४ ॥ आयूंषि वेदनीये द्वे, गोत्रे द्वे इत्यमून्यपि । आक्षिप्यन्तेऽत्र गत्यैवानन्यथाभावतः खलु ॥ ६५ ॥ जात्यादिनामगोत्रायुर्वेद्यानां कर्मणां ध्रुवम् । भवधारणहेतूनामसत्येकतरेऽपि यत् ॥ ६६ ॥ गतिर्न संभवत्येवाव्यभिचारि ततः स्फुटम् । ज्ञेयमेषां साहचर्यमर्हत्यपि तथेक्षणात् ॥ ६७ ॥ हास्यादिषट्कमाक्षिप्तं, वेदानां ग्रहणादिह । यदेतेऽव्यभिचारेण, वेदोपग्रहकारिणः

१५

२०

२५

१ अन्त्यं योगपरिणामो लेश्येत्यात्मकं मतं, नतु मनोयोगपरिणामो लेश्येत्यात्मकं, तस्य तुर्यमतत्वात्, पृथगगणना तु तस्य योगपरिणाम एवान्तर्भावात्

॥ ६८ ॥ यद्वा कषायग्रहणाद्धास्यादीनां परिग्रहः । सावर्ण्यात्सहचाराच्च, कषायनोकषाययोः ॥६९॥ इत्यर्थतस्तत्त्वार्थवृत्तौ, कर्मग्रन्थवृत्तावप्युक्तं—ननु निद्रापञ्चकसातादिवेदनीयरत्यरतिप्रभृतयः प्रभूततरा भावा अन्येऽपि कर्मोदयजन्याः सन्ति, तत्किमित्येतावन्त एवेति निर्दिष्टाः?, सत्यं, उपलक्षणत्वादन्येऽपि द्रष्टव्याः, केवलं पूर्वशास्त्रेषु एतावन्त एव निर्दिष्टा दृश्यन्ते इत्यत्राप्येतावन्त एवास्माभिः प्रदर्शिता" इति ॥ जीवत्वमथ भव्यत्वमभव्यत्वमिति त्रयः । स्युः पारिणामिका भावा, नित्यमीदृक्स्वभावतः ॥ ७० ॥ यदभव्यो न भव्यत्वं, भव्यो वा नैत्यभव्यताम् । कदाप्यजीवो जीवत्वं, जीवो वा न ह्यजीवताम् ॥ ७१ ॥ जीव एवात्र जीवत्वं, स्वार्थिकः प्रत्ययो ह्ययम् । भाविसिद्धिर्भवेद्भव्यः, सिद्ध्यनर्हस्त्वभव्यकः ॥ ७२ ॥ भावाः सन्ति परेऽप्यस्तित्वादयः पारिणामिकाः । किंतु जीवाजीवसाधारणा इत्यत्र नोदिताः ॥ ७३ ॥ जीवस्यैव परं ये स्युर्नत्वजीवस्य कर्हिचित् । ते त्रिपञ्चाशदत्रोक्ताः, सदौपशमिकादयः ॥ ७४ ॥ तथोक्तं तत्त्वार्थभाष्ये—"जीवत्वभव्यत्वाभव्यत्वादीनि च, जीवत्वं भव्यत्वमभव्यत्वमित्येते त्रयः पारिणामिका भावा भवन्ति, आदिग्रहणं किमर्थमिति?, अत्रोच्यते, अस्तित्वमन्यत्वं कर्तृत्वं भोक्तृत्वं गुणवत्त्वमनादिकर्मसंतानबद्धत्वं प्रदेशवत्त्वमरूपत्वं नित्यत्वमित्येवमादयोऽप्यनादिपारिणामिका जीवस्य भावा भवन्ती"ति तत्त्वार्थटीकायां, कर्तृत्वं सूर्यकान्तेऽपि सवितृकिरणगोमयसंगमादुपलभ्यतेऽग्निनिर्वृत्तावतस्तत्सामान्यं, भोक्तृत्वं मदिरादिष्वप्यत्यन्तं प्रसिद्धं, भुक्तोऽनया गुड इति, क्रोधादिमत्त्वाद्गुणवत्त्वं ज्ञानाद्यात्मकत्वाद्वा, परमाण्वादावपि गुणवत्त्वमेकवर्णादित्वात्समानं, अनादिकर्मसंतान-

सान्निपातिकप्रभेदाः

बद्धत्वमिति, कार्मणशरीरमप्यनादिकर्मसंतानबद्धमिति चेतनाचेतनयोर्धर्मसाम्यं, भाष्यकारः पुनरप्यादिग्रहणं कुर्वन् ज्ञापयत्यत्रानन्तधर्मकमेकं, तत्राशक्याः प्रस्तारयितुं सर्वे धर्माः, प्रतिपदं प्रवचनज्ञेन पुंसा यथासंभवमायोजनीयाः, क्रियावत्त्वं पर्यायोपयोगिता प्रदेशाष्टकनिश्चलता एवंप्रकाराः सन्ति भूयांस इति ।

आद्यः स्यादौपशमिकक्षायिकाख्यसमन्वये । द्वितीयस्त्वौपशमिकक्षायोपशमिकान्वये ॥ ७६ ॥ तृतीयश्चौपशमिकौदयिकाख्यसमागमे । चतुर्थ औपशमिकपारिणामिकसंयुतौ ॥ ७७ ॥ क्षायिकक्षायोपशमिकान्वयोत्थस्तु पञ्चमः । क्षायिकौदयिकाभ्यां च, षष्ठो भङ्गः समन्वये ॥ ७८ ॥ सप्तमस्तु क्षायिकेण, पारिणामिकसंगमे । अष्टमः स्यादौदयिकक्षायोपशमिकान्वये ॥ ७९ ॥ पारिणामिकमिश्राभ्यां, मिश्राभ्यां नवमो मतः । दशमः स्यादौदयिकपारिणामिकयोगजः ॥ ८० ॥ त्रिकसंयोगजा भंगा, दश तत्रायमादिमः । क्षयक्षयोपशमजोपशमोत्थैः समागतैः ॥ ८१ ॥ क्षायिकौदयिकाख्यौपशमिकाख्यैर्द्वितीयकः । तृतीयश्चौपशमिकक्षयोपशमक्षायिकैः ॥ ८२ ॥ औदयिकौपशमिकक्षायोपशमिकैः परः । परिणामौपशमिकक्षायोपशमिकैः परः ॥ ८३ ॥ स्यात्षष्ठश्चौपशमिकौदयिकपारिणामिकैः । क्षायिकौदयिकक्षायोपशमिकैस्तु सप्तमः ॥ ८४ ॥ पारिणामिकमिश्राख्यक्षायिकैरष्टमः स्मृतः । नवमः स्यादौदयिकक्षायिकपारिणामिकैः ॥ ८५ ॥ पारिणामिकमिश्राख्यौदयिकैर्दशमोऽपि च । चतुःसंयोगजाः पञ्च, भङ्गकास्ते त्वमी श्रुताः ॥ ८६ ॥ क्षायिकश्चौपशमिकः, क्षायोपशमिकोऽपि च । औदयिकश्चेत्यमीभिर्योगे प्रथमभङ्गकः ॥ ८७ ॥ क्षायिकोऽथौपशमिकः, क्षायोपशमिकाह्वयः ।

२०

२५

॥ ५७२ ॥

२८

पारिणामिक इत्येषां, योगे भङ्गो द्वितीयकः ॥ ८८ ॥ क्षायिकौपशमिकाख्यौ, पारिणामिक इत्यपि । औदयिकश्चेत्यमीषां, योगे भङ्गस्तृतीयकः ॥ ८९ ॥ क्षायोपशमिकश्चौपशमिकौदयिकाह्वयौ । पारिणामिक इत्येषां, योगे भङ्गस्तुरीयकः ॥ ९० ॥ क्षायिकौदयिकाभिख्यौ, क्षायोपशमिकाह्वयः । पारिणामिक एतेषां, योगे भङ्गस्तु पञ्चमः ॥ ९१ ॥ पञ्चसंयोगजश्चैकः, स्यादौपशमिकादिभिः । पञ्चभिः सन्निपतितैः, षड्विंशतिरमी समे ॥९२॥ सप्तमो द्विकयोगोत्थो, नवमो दशमोऽपि च । त्रियोगजौ चतुर्योगे, भङ्गौ चतुर्थपञ्चमौ ॥ ९३ ॥ एकः पञ्चकसंयोगी, षडमी सान्निपातिकाः । जीवेषु संभवन्त्यन्ये, विंशतिः संभवोज्झिताः ॥ ९४ ॥ यत्तु तत्त्वार्थवृत्तावेवमुक्तं-"एषामेवौपशमिकादीनां द्विकादियोगेन सान्निपातिको निष्पद्यते षड्विंशतिविकल्पः, तत्रैकादश विरोधित्वादसंभवन्तस्त्यक्ता विकल्पाः, पञ्चदशोपात्ताः संभविनः, प्रशमरतौ "षष्ठ इत्यन्यः पञ्चदशभेद" इति वचना"दिति तदभिप्रायं सम्यग् न विद्मः, यतोऽनुयोगद्वारवृत्तावेवमुक्तं "तदेवमेको द्विकसंयोगभङ्गको, द्वौ द्वौ त्रिकयोगचतुष्कयोगभङ्गकौ, एकस्त्वयं पञ्चकयोग इत्येते षड् भङ्गका अत्र संभविनः प्रतिपादिताः, शेषास्तु संयोगमात्रतयैव प्ररूपिता इति स्थितं, एतेषु च षट्सु भङ्गकेषु मध्ये एकस्त्रिकसंयोगो, द्वौ चतुष्कयोगावित्येते त्रयोऽपि प्रत्येकं चतसृष्वपि गतिषु संभवन्तीति निर्णीतमिति गतिचतुष्टयभेदात्ते किल द्वादश वक्ष्यन्ते, ये तु शेषा द्विकत्रिकपञ्चकयोगलक्षणास्त्रयो भङ्गाः सिद्धकेवल्युपशान्तमोहानां यथाक्रमं निर्णीतास्ते च यथोक्तैक-

१ सान्निपातिकमूलभेदषट्कस्यावान्तरभेदा एव पञ्चदशेति, स्पष्टं भविष्यति चैतदत्रैव, गतिभेदेन भावभेदोऽत्र

५

१०

१३

स्थानसंभवित्वात्रय एवेत्यनया विवक्षया सान्निपातिको भावः स्थानान्तरे पञ्चदशविध उक्तो द्रष्टव्यः, यदाह—"अविरुद्ध सन्निवाइयभेया एते पण्णरस"त्ति, संभवत्सु च षट्स्वेषु, सप्तमो द्विकयोगजः। सिद्धानामेव निर्दिष्टः, क्षायिकपारिणामिकः ॥ ९५ ॥ ज्ञानादि क्षायिकं ह्येषां, जीवत्वं पारिणामिकम्। सिद्धानामन्यभावानां, हेत्वभावादसंभवः ॥ ९६ ॥ त्रिकसंयोगजो यस्तु, नवमः प्राग्निरूपितः। स सर्वज्ञे क्षायिकाख्यौदयिकपारिणामिकः ॥ ९७ ॥ जीवत्वादि यतस्तस्य, वर्त्तते पारिणामिकम्। औदयिकी नरगतिर्ज्ञानादि क्षायिकं तथा ॥ ९८ ॥ त्रिकसंयोगजो यस्तु, दशमः प्राक् प्रदर्शितः। स चतुर्धा भवेन्मिश्रौदयिकपारिणामिकः ॥ ९९ ॥ यतः संयोगजो यस्तु, दशमः प्राक् प्रदर्शितः। स चतुर्द्धा (मनुष्याणां) भवेन्मिश्रौदयिकपारिणामिकः ॥ १०० ॥ एवं तिर्यगादिगत्यभिलापेन त्रयः परे। भवन्ति भङ्गकास्ते च, स्वयं वाच्या विवेकिभिः ॥ १ ॥ चतुस्संयोगजौ यौ च, भङ्गौ तुरीयपञ्चमौ। प्रत्येकं तावपि स्यातां, गतिभेदाच्चतुर्विधौ ॥ २ ॥ तथाहि—सम्यक्त्वमौपशमिकं, कृतत्रिपुञ्जदेहिनाम्। खानि मिश्राणि जीवत्वं, स्यात्तेषां पारिणामिकम् ॥ ३ ॥ गतिर्भवत्यौदयिकी, यदेषां नरकादिका। चतुःसंयोगजस्तुर्यश्चतुर्भेदो भवेदिति ॥ ४ ॥ सम्यक्त्वं क्षायिकं खानि, मिश्राणि पारिणामिकम्। जीवत्वमेवौदयिकी, गतिः स्यान्नरकादिका ॥ ५ ॥ चतुःसंयोगजश्चैवं, पञ्चमोऽपि चतुर्विधः। नृणामुपशमश्रेण्यां, पञ्चसंयोगजः पुनः ॥६॥ यो हि क्षायिकसम्यक्त्वी, मनुजः प्रतिपद्यते। विशुद्धोपशमश्रेणीं, क्षायिकं तस्य दर्शनम् ॥ ७ ॥ चारित्रं चौपशमिकं, तन्मोहोपशमाद्भवेत्। गतिरौदयिकी खानि,

२०

२५

॥५७३॥

२७

क्षायोपशमिकान्यथ ॥ ८ ॥ जीवत्वमथ भव्यत्वं, भवेतां पारिणामिके । पञ्चसंयोगजस्यैकविधस्यैवं हि संभवः ॥ ९ ॥ सान्निपातिकभेदानां, षण्णां संभविनामिति । उक्ता भेदाः पञ्चदश, प्रतिभेदविवक्षया ॥ १० ॥ जीवेषु षडमी भावा, यथासंभवमाहिताः । अजीवेषु त्वौदयिकपारिणामिकसंज्ञकौ ॥ ११ ॥ तथाहि—धर्माधर्माभ्रास्तिकायकालेषु पारिणामिकः । एक एवानाद्यनन्तो, निर्दिष्टः श्रुतपारगैः ॥ १२ ॥ चलनस्थित्युपष्टम्भावकाशदानधर्मकाः । सर्वदाऽमी परिणताः, परिणामेन तादृशाः ॥ १३ ॥ आवल्यादिपरिणामोररीकारान्निरन्तरम् । अनाद्यनन्तो भावः स्यात्कालस्य पारिणामिकः ॥ १४ ॥ वर्त्तनालक्षणः कालः, क्षणावल्यादिकः परः । इति द्वेधा निगदितः, कालः केवलशालिभिः ॥ १५ ॥ तेन तेन स्वरूपेण, वर्त्तन्तेऽर्था जगत्सु ये । तेषां प्रयोजकत्वं यद्वर्त्तना सा प्रकीर्त्तिता ॥ १६ ॥ सा लक्षणं लिङ्गमस्य, वर्त्तनालक्षणस्ततः । सर्वक्षेत्रद्रव्यभावव्यापी कालो भवत्ययम् ॥ १७ ॥ समयावलिकादिस्तु, समयक्षेत्रवर्त्तिषु । द्रव्यादिष्वस्ति न ततो, बहिर्वर्त्तिषु तेष्वयम् ॥ १८ ॥ अन्यान्यसमयोत्पत्तेरेकक्षणात्मकोऽप्ययम् । आवल्यादिपरीणामं, सदा परिणमत्यहो ॥ १९ ॥ स्यात्पुद्गलास्तिकाये तु, साद्यन्तः पारिणामिकः । भवेदौदयिकोऽप्यस्मिन्, भावः स्कन्धेषु केषुचित् ॥ २० ॥ स्कन्धानां द्व्यणुकादीनां, साद्यन्तः पारिणामिकः । तेन तेन स्वरूपेण, साद्यन्तपरिणामतः ॥ २१ ॥ स्यादेवं परमाणूनां, साद्यन्तः पारिणामिकः । स्कन्धान्तर्भावतो वर्णगन्धादिव्यत्ययादपि ॥ २२ ॥ अनन्ताणवात्मकाः स्कन्धा, ये जीवग्रहणोचिताः । स्यात्पारिणामिको भावस्तेषामौदयिकोऽपि च ॥ २३ ॥ शरीरादिनामकर्मोदयेन

जनितो यथा। औदारिकादिस्कन्धानां, तत्तद्देहतयोदयः ॥ २४ ॥ ये जीवग्रहणानर्हाः, स्कन्धाः सूक्ष्माश्च येऽणवः। तेषां नौदयिको भावः, केवलं पारिणामिकः ॥ २५ ॥ उदय एवौदयिक, इति व्युत्पत्त्यपेक्षया। कर्मस्कंन्धेष्वौदयिको, भावो भवति तद्यथा ॥ २६ ॥ क्रोधादीनां य उदयो, जीवानां जायते स वै। कर्मस्कन्धोदयो ज्ञेयः, कर्मस्कन्धात्मका हि ते ॥ २७॥ कर्मस्कन्धाश्रिता एवं, नन्वौपशमिकादयः। संभवन्तः कथं भावा, अजीवेषु न कीर्त्तिताः? ॥ २८॥ सत्यं ते संभवन्त्येव, तेषां किंच निरूपणे। अविवक्षैव हेतुत्वं, बिभर्त्ति प्राक्तनादृता ॥ २९ ॥ भवत्वौदयिकोऽप्येवं, संभवन्नविवक्षितः। समाने संभवे पङ्क्तिभेदोऽयं कथमर्हति? ॥ ३० ॥ सत्यमेष पङ्क्तिभेदो, विज्ञैः कैश्चिन्निराकृतः। अजीवेषूदितो यत्तैः, केवलं पारिणामिकः ॥ ३१ ॥ तथोक्तं कर्मग्रन्थवृत्तौ-"नन्वेवं कर्मस्कन्धाश्रिता औपशमिकादयो भावा अजीवानां संभवन्त्यतस्तेषामपि भणनं प्राप्नोति, सत्यं, तेषामविवक्षितत्वाद्, अत एव कैश्चिदजीवानां पारिणामिक एव भावोऽभ्युपगम्यत" इति।

२०

जीवाजीवाश्रिता भावा, इति सम्यग्निरूपिताः। अधिकृत्याथ कर्माणि, कुर्मो भावप्ररूपणम् ॥ ३२ ॥ क्षायिकश्चौपशमिको, मिश्रश्च पारिणामिकः। तथौदयिक इत्येते, पञ्चापि मोहनीयके ॥ ३३ ॥ ज्ञानदर्शनावरणान्तरायेषु च कर्मसु। भावा भवन्ति चत्वार, एवौपशमिकं विना ॥ ३४॥ तत्रापि केवलज्ञानदर्शनावरणाख्ययोः। विपाकोदयविष्कम्भाभावान्मिश्रो न संभवेत् ॥ ३५ ॥ वेदनीयनामगोत्रायुषां तु त्रय एव ते। विना मिश्रौपशमिकौ, पारिणामक्षयोदयाः ॥३६॥ तत्र च-क्षय आत्यन्तिकोच्छेदः, स्वविपाकोपपादकः। उदयः परिणामस्तु,

२५

२८

जीवांशैर्मिश्रता भृशम् ॥३७॥ यद्वा—तत्तद्द्रव्यक्षेत्रकालाध्यवसायव्यपेक्षया। संक्रमादितया वा यः, परिणामः स एव सः ॥ ३८ ॥ उपशमोऽत्रानुदयावस्था भस्मावृताग्निवत्। स मोहनीय एव स्यान्न जात्वन्येषु कर्मसु ॥ ३९ ॥ सर्वोपशम एवायं, विज्ञेयो न तु देशतः। यद्देशोपशमस्तु स्यादन्येषामपि कर्मणाम् ॥ ४० ॥ चतुर्णां घातिनामेव, क्षयोपशम इष्यते। कर्मस्वष्टास्वपीह स्युः, परिणामक्षयोदयाः ॥ ४१ ॥

नृतिर्यग्देवनरकरूपे गतिचतुष्टये। पञ्चापि भावा ज्ञेया यज्जीवत्वं पारिणामिकम् ॥ ४२ ॥ सम्यक्त्वमौपशमिकं, क्षायिकं चेन्द्रियाणि च। क्षायोपशमिकान्यासु, गतिरौदयिकी भवेत् ॥ ४३ ॥ तौ द्वावेव सिद्धगतौ, क्षायिकपारिणामिकौ। ज्ञानादि क्षायिकं तत्र, जीवत्वं पारिणामिकं ॥ ४४ ॥ एवं च—गत्यादिमार्गणाद्वारेष्वेवं स्युर्नियतास्त्रयः। क्षायिकौपशमिकौ तु, भजनीयौ यथायथम् ॥ ४५ ॥ यत्क्षायिकौपशमिकभावयोः सन्ति संभवे। वाच्याः पञ्चान्यथा मिश्रौदयिकपारिणामिकाः ॥ ४६ ॥

एवं कर्मस्वमी भावा, यथाऽऽम्नायं निरूपिताः। अथो गुणस्थानकेषु, कुर्मो भावप्ररूपणाम् ॥ ४७ ॥ सम्यग्दृष्ट्यादिषु गुणस्थानकेषु चतुर्ष्विह। भावास्त्रयोऽथ चत्वारो, लभ्यन्ते किल तद्यथा ॥ ४८ ॥ त्रयः क्षायोपशमिकसम्यग्दृष्टेर्भवन्ति यत्। गतिरौदयिकी तेषां, जीवत्वं पारिणामिकम् ॥ ४९ ॥ क्षायोपशमिकं सम्यग्दर्शनं चेन्द्रियाणि च। चत्वारश्चौपशमिकक्षायिकदर्शनस्पृशः ॥५०॥ सम्यक्त्वमौपशमिकं, तेषां च क्षायिकं भवेत्। मिश्राणि खानि जीवत्वं, गतिश्चात्रापि पूर्ववत् ॥ ५१ ॥ अनिवृत्तिबादराख्यसुसूक्ष्मसंपराययोः। चत्वारः पञ्च

५
१०
१४

वा भावास्त्रयस्तत्र च पूर्ववत् ॥५२॥ सम्यक्त्वमौपशमिकं, श्रेणावुपशमस्पृशि । क्षायिकं क्षपकश्रेण्यां, द्विधाप्येवं चतुष्टये ॥ ५३ ॥ पञ्चमस्त्वौपशमिकचारित्रान्वय इष्यते । शास्त्रान्तरे तत्कथितमनयोर्गुणयोरपि ॥ ५४ ॥ तथोक्तं कर्मग्रन्थवृत्तौ—"एषामेव चतुर्णां मध्येऽनिवृत्तिबादरसूक्ष्मसंपरायगुणस्थानकद्वयवर्त्तिनोऽप्यौपशमिकचारित्रस्य शास्त्रान्तरे प्रतिपादनादौपशमिकचारित्रप्रक्षेपे पञ्चम" इति। तथोपशान्तमोहेऽपि, चत्वारः पञ्च वा स्मृताः । पञ्च क्षायिकसम्यक्त्वभृतोऽन्यस्य चतुष्टयम् ॥ ५५ ॥ चत्वारोऽपूर्वकरणे, क्षीणमोहे च ते स्मृताः । त्रयस्तु पूर्ववन्मिश्रौदयिकपारिणामिकाः ॥ ५६ ॥ सम्यक्त्वं क्षायिकं क्षीणमोहे भावस्तुरीयकः । क्षायिकं चौपशमिकमपूर्वकरणे पुनः ॥ ५७ ॥ मिथ्यादृष्टौ तथा सास्वादने मिश्रगुणेऽपि च । सयोगिकेवल्याख्ये चायोगिकेवलिसंज्ञके ॥ ५८ ॥ पञ्चस्वमीषु प्रत्येकं, त्रयो भावा उदाहृताः । तत्राद्यत्रितये मिश्रौदयिकपारिणामिकाः ॥ ५९ ॥ अन्त्यद्वये त्वौदयिकक्षायिकपारिणामिकाः । ज्ञानादि क्षायिकं शेषौ, गतिजीवत्वगोचरौ ॥ ६० ॥ भावाः स्वाम्यादिभेदेन, विशिष्यैवं निरूपिताः । सामान्यतः संभविनो, भावान् वच्मि गुणेष्वथ ॥ ६१ ॥ त्रयस्त्रिषु गुणस्थानेष्वाद्येषु ते च पूर्ववत् । तुर्यादिष्वष्टसु पुनः, प्रत्येकं पञ्च कीर्त्तिताः ॥ ६२ ॥ तथाहि—सम्यक्त्वमौपशमिकं, चतुर्थादिगुणाष्टके । क्षायिकं च चतुर्थादिष्वेकादशसु संभवेत् ॥ ६३ ॥ मिश्रं सम्यक्त्वेन्द्रियादि, चतुर्थादिचतुष्टये । खं चारित्रे चाष्टमादौ, त्रय एकादशे तु खम् ॥ ६४ ॥ गतिः सर्वत्रौदयिकी, जीवत्वं पारिणामिकम् । एवं भावित एतेषु, तावत्पञ्चकसंभवः ॥ ६५ ॥ क्षीणमोहे च चत्वारस्त औपशमिकं विना ।

कर्मगति-गुणस्थानेषु भावाः

२०

२५

॥५७५॥

२८

अन्त्यद्वये त्रयो भावा, मिश्रौपशमिकौ विना ॥ ६६ ॥

पञ्चाप्येवं मूलभेदा, गुणस्थानेषु भाविताः । एतेष्वेवाथ भावानां, प्रतिभेदान् प्रतन्महे ॥ ६७ ॥ दश मिथ्यादृष्टिसास्वादनयोर्गुणयोः स्मृताः । क्षायोपशमिकाख्यस्य, प्रतिभेदा जिनैर्यथा ॥ ६८ विघ्नक्षयोपशमजाः, पञ्च दानादिलब्धयः । अज्ञानत्रितयं चक्षुरचक्षुर्दर्शने इति ॥ ६९ ॥ भेदा द्वादश मिश्राख्ये, सम्यक्त्वं मिश्ररूपकम् । दानादिपञ्चकं ज्ञानदर्शनानां त्रयं त्रयम् । ॥ ७० ॥ ज्ञानाज्ञानान्यतरांशबाहुल्यमिह संभवेत् । क्वचित्क्वचिच्चोभयांशसमता वाऽऽत्र यद्यपि ॥७१॥ तथापि विज्ञैर्ज्ञानांशबाहुल्यस्य विवक्षया । उक्तं ज्ञानत्रयं मिश्रगुणस्थाने गुणाश्रये ॥ ७२ ॥ अस्मिंश्च यद्गुणस्थाने, दर्शनत्रयमीरितम् । तच्च सैद्धान्तिकमतापेक्षयेति विभाव्यताम् ॥७३॥ स्युर्द्वादशैवाविरतसम्यग्दृश्यपि मिश्रवत् । क्षायोपशमिकं मिश्रस्थाने सम्यक्त्वमत्र तु ॥७४॥ द्वादशस्वेषु सदेशविरतिक्षेपतः स्मृताः । क्षायोपशमिका भावास्त्रयोदशैव पञ्चमे ॥ ७५ ॥ एतेभ्यो देशविरतित्यागे द्वादश ये स्थिताः । तेष्वेव सर्वविरतिमनोज्ञानसमन्वये ॥ ७६ ॥ षष्ठसप्तमयोर्भावा, भवन्त्येते चतुर्दश । क्षायोपशमिकाख्येन, सम्यक्त्वेन विना त्वमी ॥ ७७ ॥ त्रयोदशाष्टमे भावा, नवमे दशमेऽपि च । अष्टमादिषु सम्यक्त्वं, क्षायोपशमिकं न यत् ॥७८॥ एकादशद्वादशयोर्गुणस्थानकयोरमी । विना क्षायोपशमिकं, चारित्रं द्वादशोदिताः ॥ ७९ ॥ एकादशे गुणस्थाने, यदौपशमिकं परम् । चारित्रं क्षायिकं च स्यात्, केवलं द्वादशे गुणे ॥ ८० ॥ दर्शनत्रितयं ज्ञानचतुष्कं लब्धिपञ्चकम् । अमी भावा द्वादशोपशान्तक्षीणविमोहयोः ॥ ८१ ॥

इति क्षायोपशमिकप्रतिभेदा विभाविताः। गुणस्थानेष्वौदयिकप्रतिभेदान् ब्रवीम्यथ ॥ ८२ ॥ अज्ञानाद्या औ-
दयिका, भावा य एकविंशतिः । सर्वेऽपि ते स्युर्मिथ्यात्वगुणस्थाने शरीरिणाम् ॥८३॥ सास्वादने च मिथ्यात्वं,
विना त एव विंशतिः । अज्ञानेन विनैकोनविंशतिर्मिश्रतुर्ययोः ॥८४॥ वेदाः ३ कषाया ४ गतयो ४, लेश्या-
६ श्चासंयमोऽपि १ च । असिद्धत्व २ ममी तुर्यतृतीयगुणयोः स्मृताः ॥ ८५ ॥ एकोनविंशतेरेभ्यो, देवश्वभ्र-
गती विना । शेषाः सप्तदश ख्याता, गुणस्थाने हि पञ्चमे ॥ ८६ ॥ नरतिर्यग्गती लेश्या, असिद्धत्वमसंयमः ।
वेदाः कषाया इत्येते, स्युर्गुणे देशसंवरे ॥ ८७ ॥ प्रमत्ते च पञ्चदश, भावा औदयिकाः स्मृताः । उदयेऽत्र
भवेतां यन्न तिर्यग्गत्यसंयमौ ॥ ८८ ॥ अप्रमत्ते द्वादशाद्यलेश्यात्रयविनाकृताः । कषाय ४ वेद ३ नृगति १-
त्र्यन्त्यलेश्यमसिद्धता ॥ ८९ ॥ नवमाष्टमयोस्तेजःपद्मलेश्ये विना दश । नृगत्यसिद्धताशुक्ललेश्यावेदकषायकाः
॥ ९० ॥ लोभः संज्वलनः शुक्ललेश्या नृगत्यसिद्धते । चत्वार एवौदयिका, भवन्ति दशमे गुणे ॥ ९१ ॥ आ-
द्यास्त्रयः कषाया यत्त्रयो वेदाः षडप्यमी । भावा औदयिकाः सूक्ष्मसंपराये भवन्ति न ॥ ९२ ॥ एकादशे
विना लोभं, द्वादशेऽपि त्रयोदशे । त्रयोऽन्त्यलेश्यासिद्धत्वमनुष्यगतिलक्षणाः ॥ ९३ ॥ असिद्धत्वं च
नृगतिर्द्वे गुणस्थानकेऽन्तिमे । लेश्या न स्यात्तत्र यस्मादयोगित्वमलेश्यता ॥ ९४ ॥ एवमौदयिका भावा,
गुणस्थानेषु भाविताः । तथौपशमिकौ भावौ, भावयामो गुणेष्वथ ॥ ९५ ॥ सम्यक्त्वमौपशमिकमेकं तुर्या-
दिपञ्चके । तादृक्सम्यक्त्वचारित्रे, नवमादित्रये पुनः ॥ ९६ ॥ चारित्रमौपशमिकं, नवमादिगुणत्रये । शास्त्रा-

२०

२५
॥५७६॥

२८

न्तरेषु यत्प्रोक्तं, कैश्चित्तेषां मतं त्वदः । ॥ ९७ ॥ येषां मते तु नवमे, दशमे च गुणास्पदे । मिश्रोत्थं स्याद्व्रतं कृत्स्नं, तन्मोहानुपशान्तितः ॥ ९८ ॥ तन्मते त्वौपशमिकं, व्रतमेकादशे गुणे । पूर्वेऽनुमन्वते सद्वृत्तसत्सामी-प्यादनागतम् ॥ ९९ ॥ इत्यौपशमिकौ भावौ, गुणस्थानेषु भावितौ । प्रतिभेदा विभाव्यन्ते, क्षायिकस्य गुणे-ष्वथ ॥ २०० ॥ सम्यक्त्वं क्षायिकं प्रोक्तं, तुरीयादिगुणाष्टके । क्षीणमोहे च चारित्रसम्यक्त्वे क्षायिके उभे ॥ १ ॥ लब्धयः पञ्च दानाद्याः, केवले ज्ञानदर्शने । तथा सम्यक्त्वचारित्रे, नवेत्यन्त्यगुणद्वये ॥ २ ॥ इत्येवं क्षायिका भेदा, गुणस्थानेषु भाविताः । पारिणामिकभावस्य, प्रतिभेदानथ ब्रुवे ॥ ३ ॥ अभव्यत्वं च भव्यत्वं, तथा जीवत्वमित्यमी । मिथ्यादृष्टिगुणस्थाने, भावाः स्युः पारिणामिकाः ॥ ४ ॥ द्वितीयादिक्षीणमोहपर्यन्तेषु गुणेषु च । स्यातां जीवत्वभव्यत्वे, अभव्यत्वविनाकृते ॥ ५ ॥ स्यादेकमेव जीवत्वं, चरमे च गुणद्वये । सप्र-भेदा गुणस्थानेष्वेवं भावाः प्ररूपिताः ॥६॥ कथं च ननु भव्यत्वाभावोऽन्तिमगुणद्वये । निर्वाणगमनार्हो हि, भव्यो-ऽर्हद्भिर्यतः स्मृतः ॥ ७ ॥ अत्रोच्यते—प्रत्यासन्नभाविसिद्धावस्थायां तद्भावतः । अत्रापि भव्यत्वाभावः, शास्त्रकृद्भिर्विवक्षितः ॥ ८ ॥ यद्वा परेण केनापि, हेतुना न विवक्षितम् । भव्यत्वमिह शास्त्रेषु, नोक्तमस्माभि-रप्यतः ॥ ९ ॥ सान्निपातिकभावोऽथ, गुणस्थानेषु भाव्यते । अनेकधा स च यथागुणस्थानं परापरैः ॥ १० ॥ यावतां यत्र भावानां, भेदा यावन्त ईरिताः । तेषां तत्र गुणस्थाने, कृते संकलने सति ॥ ११ ॥ स्यात्तावद्भेद-निष्पन्नो, भावोऽयं सान्निपातिकः । नामग्राहं गुणस्थानेष्वेषोऽथ परिभाव्यते ॥१२॥ मिथ्यादृष्टावौदयिकभावा

यथैकविंशतिः। दश क्षायोपशमिकास्त्रयश्च पारिणामिकाः ॥१३॥ एवं भावाश्चतुस्त्रिंशज्जाताः संकलिताः समे। चतुस्त्रिंशद्भेदजातस्ततोऽत्र सान्निपातिकः ॥१४॥ भवेत्सास्वादने चैष, द्वात्रिंशद्भेदभावितः। त्रयस्त्रिंशद्भेदजातो, मिश्रे स्यात्सान्निपातिकः ॥ १५ ॥ पञ्चत्रिंशद्भेदभूतो, गुणस्थाने तुरीयके। पञ्चमे च चतुस्त्रिंशत्प्रतिभेदसमुद्भवः ॥१६॥ प्रमत्ते च त्रयस्त्रिंशद्भेदजः सान्निपातिकः। अप्रमत्तगुणस्थाने, त्रिंशद्भेदसमुच्छ्रितः ॥१७॥ सप्तविंशतिभेदोत्थो, गुणस्थानेऽयमष्टमे। नवमे च गुणस्थाने, सोऽष्टाविंशतिनिर्मितः ॥ १८ ॥ स सूक्ष्मसंपराये स्याद्, द्वाविंशतिसमुद्भवः। तथोपशान्तमोहेऽयं, भेदविंशतिभावितः ॥ १९ ॥ क्षीणमोहेऽयमेकोनविंशतिप्रतिभेदजः। स सयोगिनि सर्वज्ञे, त्रयोदशभिदुद्भवः ॥ २० ॥ अयोगिनि द्वादशभिर्भेदैः स्यात्सान्निपातिकः। ज्ञेया भेदास्तु सर्वेऽमी, सर्वत्रोक्तानुसारतः ॥ २१ ॥ अत्र नवमदशमयोर्गुणस्थानयोरौपशमिकचारित्रांगीकारपक्षे द्वावौपशमिकौ भावौ, अन्यथा चैक एवेति ज्ञेयं।

भावतत्प्रभेदस्थितिः

२०

चतुर्भंग्याऽथ भाव्यन्ते, भावा औदयिकादयः। साद्यन्त १ साद्यनन्ता २ ऽनादिसान्ता ३ ऽनाद्यन्तकाः ४ ॥ २२ ॥ गत्यादिरत्रौदयिकः, सादिः सान्तो भवेद्यतः। नृदेवतिर्यग्नरकगतीनां सादिसान्तता ॥ २३ ॥ सादिश्चानन्त इत्येष, भङ्गस्त्वत्र न संभवेत्। सादिकानां गतीनां यदनन्तत्वमसंभवि ॥ २४ ॥ अनादयोऽपि मिथ्यात्वाद्य औदयिकाश्च ये। भव्यानाश्रित्य विज्ञेयास्तेऽत्र भङ्गे तृतीयके ॥२५॥ अभव्यापेक्षया त्वेते, भाव्या भङ्गे तुरीयके। भावनैवं कषायादिभावानां क्रियते यथा ॥ २६ ॥ वेदत्रयं च मिथ्यात्वं, कषायाणां चतुष्टयम्।

२५

॥५७७॥

२८

लेश्याश्च षडसिद्धत्वमज्ञानासंयमावपि ॥ २७ ॥ अमी औदयिकाः ससदश भव्यव्यपेक्षया । भङ्गे तृतीये तुर्ये च, भङ्गेऽभव्यव्यपेक्षया ॥ २८ ॥ सम्यक्त्वमौपशमिकं, चारित्रमपि तादृशम् । द्वावौपशमिकावेतौ, केवलं सादिसान्तकौ ॥ २९ ॥ आदिसम्यक्त्वलाभे यच्छ्रेण्यां वेदमवाप्यते । चारित्रमप्युपशमश्रेण्यामेवेदमाप्यते ॥ ३० ॥ तयोश्चावश्यपातेन, भङ्गोऽत्र प्रथमः स्थितः । तदाश्रित्यौपशमिके, शून्या भङ्गास्त्रयः परे ॥ ३१ ॥ चारित्रं क्षायिकमथ, दानादिलब्धिपञ्चकम् । आश्रित्य क्षायिको भावो, भङ्गे स्यात्सादिसान्तके ॥ ३२ ॥ तथोक्तं महाभाष्ये–"सम्मत्तचरित्ताइं साई संतो य ओवसमिओऽयं। दाणाइलद्धिपणगं चरणंपि अ खाइओ भावो ॥ १ ॥" ननु चारित्रमस्त्येव, सिद्धस्यापीति तत्कथम् । न साद्यनन्ते भङ्गे स्यादत्राकर्णयतोत्तरम् ॥ ३३ ॥ न चरित्री नाचरित्री, न चरित्राचरित्र्यपि । सिद्धा एवंविधाः प्रोक्ताः, पञ्चमाङ्गे जिनेश्वरैः ॥ ३४ ॥ 'सिद्धे नोचरित्ती' इत्यादि च तत्सूत्रं॥ सम्यक्त्वं क्षायिकमथ, केवले ज्ञानदर्शने । इत्येतत्त्रयमाश्रित्य, क्षायिकः साद्यनन्तकः ॥३५॥ शेषौ तु भङ्गकावत्र, शून्यावेव स्थितावुभौ । अनादिसान्तोऽनाद्यन्तः, क्षायिकः सम्भवेन्न यत् ॥ ३६ ॥ इच्छन्ति सिद्धस्याप्यन्ये, चारित्रं लब्धिपञ्चकम् । सिद्धत्वेऽपि हि निर्मूलमेतदावरणक्षयात् ॥ ३७ ॥ एषामावरणाभावेऽप्यसत्त्वं यदि कल्प्यते । क्षीणमोहादिकेष्वेवं, तदभावः प्रसज्यते ॥ ३८ ॥ तदेतन्मतमाश्रित्य, चारित्रे लब्धिपञ्चके । सिद्धेषु स्वीकृते साद्यनन्तः स्यात्क्षायिकः परम् ॥ ३९ ॥ शेषा भङ्गास्त्रयः शून्याः, क्षायिकस्याप्यपेक्षया । भङ्गव्यवस्था क्रियते, क्षायोपशमिकेष्वथ ॥४०॥ छाद्मस्थिकानि ज्ञानानि,

चत्वार्याश्रित्य निश्रितम् । क्षायोपशमिको भावः, सादिः सान्त इति स्मृतः ॥ ४१ ॥ भङ्गो द्वितीयः शून्योऽत्राप्येषां सम्यक्त्वसंश्रयात् । यदुत्पातोऽन्तश्च पुनर्मिथ्यात्वे केवलेऽपि च ॥ ४२ ॥ मत्यज्ञानश्रुताज्ञाने, स्यातां भव्यव्यपेक्षया । अनादिसान्ते तुर्ये च, भङ्गेऽभव्यव्यपेक्षया ॥४३॥ क्षायोपशमिकोऽचक्षुर्दर्शनापेक्षया भवेत् । भङ्गे तृतीये भव्यानामभव्यानां तुरीयके ॥ ४४ ॥ विभङ्गज्ञानमवधिचक्षुषी किल दर्शने । दानाद्या लब्धयः पञ्च, संयमौ देशसर्वतः ॥ ४५ ॥ सम्यक्त्वमेषामित्येकादशानां च व्यपेक्षया । क्षायोपशमिको भावः, साद्यन्तः केवलं भवेत् ॥ ४६ ॥ विशेषावश्यकसूत्रवृत्त्योस्तु केनापि हेतुना षण्णामेव क्षायोपशमिकानां भङ्गकव्यवस्थोक्ता, ततः शेषाणामचक्षुर्दर्शनादीनां द्वादशानां यथासम्भवमस्माभिर्लिखितेति ज्ञेयम् ।

पारिणामिकभावोऽपि, सर्वपुद्गलगोचरः । सादिः सान्तश्च विज्ञेयः, पर्यायपरिवृत्तितः ॥ ४७ ॥ शून्य एव भवेद्भङ्गो, द्वितीयोऽत्रापि पूर्ववत् । सादीनां द्व्यणुकादीनां, ह्यनन्तत्वमसम्भवि ॥ ४८ ॥ तथा भवति भव्यत्वमाश्रित्य पारिणामिकः । अनादिसान्तः सिद्धा हि, नाभव्या न च भव्यकाः ॥ ४९ ॥ तथोक्तं—'सिद्धे नो भव्वे नो अभव्वे' इति । अभव्यत्वं च जीवत्वं, चाश्रित्यानाद्यनन्तकः । स्यात्पारिणामिको भावोऽनयोर्यन्नोद्भवक्षयौ ॥ ५० ॥ एवमुक्तचतुर्भङ्ग्या, या भावानामवस्थितिः । सा भावकाल इत्युक्तो, महाभाष्यप्रणेतृभिः ॥ ५१ ॥ साईसपज्जवसिओ चउभंगविभागभावणा एत्थ । ओदइयाईयाणं तं जाणसु भावकालं तु ॥५२॥ इत्याद्यर्थतो

१ तत्र हि मुख्यवृत्त्या कालमधिकृत्य सादिसान्तादितापदर्शनमेव प्रयोजनं, न तु भावप्रकरणं तत्र ।

भावानां साद्यादिभंगाः

२०

२५

२७

विशेषावश्यकसूत्रवृत्त्योः । भावानां भगवदुपज्ञशास्त्रदृष्ट्या, दिग्मात्रं गदितमिहातिमात्रतुष्ट्या । पूर्णेऽस्मिन्निति गुणभाजि भावलोके, ग्रन्थोऽयं समुदवहत्समाप्तिलक्ष्मीम् ॥ ९३ ॥ विश्वाश्चर्यदकीर्त्तिकीर्तिविजयश्रीवाचकेन्द्रान्तिषद्राजश्रीतनयोऽतनिष्ट विनयः श्रीतेजपालात्मजः । काव्यं यत्किल तत्र निश्चितजगत्तत्त्वप्रदीपोपमे, षट्त्रिंशत्तम एष निर्भररसः सर्गः समाप्तः सुखम् ॥ २९४ ॥

इति श्रीलोकप्रकाशे षट्त्रिंशत्तमः सर्गः भावलोकवर्णनमयः समाप्तः ॥ श्रीरस्तु ॥

॥ अथ सप्तत्रिंशत्तमः सर्गः प्रारभ्यते ॥

पार्श्वं शङ्खेश्वरोत्तंसं, प्रणम्य परमेश्वरम्। लोकप्रकाशग्रन्थस्य, करोम्युक्तार्थबीजकम् ॥१॥ मङ्गलाचरणं तावद्-भिधेयप्रयोजने। शिष्टप्रसादनौद्धत्यत्यागो ग्रन्थस्य नाम च ॥२॥ अङ्गुलयोजनरज्जूपल्याब्धिनिरूपणानि गुणकारः। भागाहृतिसंख्येयासंख्यानन्तानि चादिमे सर्गे १ ॥ ३ ॥ (गीतिः) द्रव्यक्षेत्रकालभावलोकानां नाममात्रतः। आख्याऽथ धर्माधर्माप्रसिद्धाख्यातिर्द्वितीयके २ ॥४॥ द्वारैः सप्तत्रिंशता यैरुक्ताः संसारिणोऽङ्गिनः। सर्गे तृतीयके तेषां, द्वाराणामस्ति विस्तृतिः ३ ॥५॥ पृथ्वीकायादयः सूक्ष्माः, सर्गे ४ तुर्येऽथ पञ्चमे। त एव बादराः ५ षष्ठे, तिर्यञ्चो द्वीन्द्रियादयः ६ ॥६॥ मनुष्याः सप्तमे ७ देवा, अष्टमे ८ नवमे पुनः। नारका ९ दशमे जन्मसंवेधः सर्वदेहिनाम् १० ॥७॥ महाल्पबहुता कर्मप्रकृतीनां च कीर्तनम्। एकादशे पुद्गलास्तिकायस्वरूपवर्णनम् ११ ॥८॥ इति द्रव्यलोकः ॥ १०

क्षेत्रलोकेऽथ लोकस्य, सामान्येन निरूपणम्। दिशां निरूपणं लोके, रज्जुखण्डुककीर्त्तनम् ॥ ९ ॥ संवर्त्तितस्य लोकस्य, स्वरूपं च निदर्शितम्। महत्तायामस्य रत्नप्रभापृथ्वीनिरूपणम् ॥ १० ॥ व्यन्तराणां नगरादि-समृद्धिपरिकीर्त्तनम्। इत्यादि द्वादशे सर्गे, सविशेषं निरूपितं १२ ॥ ११ ॥ स्वरूपं भवनेशानां, तदिन्द्राणां च वर्णिता। सामानिकाग्रपत्न्यादिसंपत् सर्गे त्रयोदशे १३ ॥१२॥ चतुर्दशे च सप्तानां, नरकाणां निरूपणम्। प्रस्तट-स्थितिलेश्यायुर्वेदनाद्युक्तिपूर्वकम् १४ ॥ १३ ॥ सर्गे पञ्चदशे तिर्यग्लोके द्वीपाब्धिशंसनम्। जम्बूद्वीपस्य जगती-

१५

१८

द्वारतत्स्वामिवर्णनम् ॥ १४ ॥ क्षेत्रस्य भरतस्याथ, वैताढ्यस्य च भूभृतः। सगुहस्य सकूटस्य, गिरेर्हिमवतोऽपि च ॥ १५ ॥ पद्महृदस्य श्रीदेव्याः, गङ्गादिसरितामपि। दाढानगान्तरद्वीपतद्वासियुग्मिवर्णनम् ॥ १६ ॥ ततो हैमवतक्षेत्रतद्वैताढ्याद्रिवर्णनम्। ततो महाहिमवतः, सरिच्छृङ्गहृदस्पृशः ॥ १७ ॥ क्षेत्रस्य हरिवर्षस्य, निषधाद्रेश्च वर्णनम्। शीताशीतोदयोः पञ्चहृदवत्योश्च षोडशे १६ ॥ १८ ॥ देवकुरूत्तरकुरुपूर्वापरविदेहकाः। सामान्यतश्चतुर्धेति, महाविदेहवर्णनम् ॥ १९ ॥ विजयानां वक्षस्कारान्तर्नदीनां च कीर्त्तनम्। विजयेषु च वैताढ्यषट्खण्डनगरीस्थितिः ॥ २० ॥ गन्धमादनसन्माल्यवतोश्च गजदन्तयोः। उत्तराणां कुरूणां च, विस्तरेण निरूपणम् ॥ २१ ॥ यमकाद्र्योर्हृदानां च, काञ्चनक्ष्माभृतामपि। जम्बूतरोः सकूटस्य, साधिपस्य निरूपणम् ॥ २२ ॥ सौमनसविद्युत्प्रभगजदन्तनिरूपणम्। स्थितिर्देवकुरूणां च, विचित्रचित्रभूभृतोः ॥ २३ ॥ ह्रदानां काञ्चनाद्रीणां, तरोः शाल्मलिनोऽपि च। इत्यादि वर्णनं व्यक्तया, सर्गे सप्तदशे कृतम् १७ ॥ २४ ॥ मेरुश्चतुर्वनः कूटमेखलाचूलिकादियुक्। साभिषेकशिलश्चाष्टादशे सर्गे निरूपितः १८ ॥२५॥ गिरेर्नीलवतः कूटहृददेव्यादिशालिनः। शीतानारीकान्तयोश्च, नाममात्रेण वर्णनम् ॥ २६ ॥ क्षेत्रस्य रम्यकाख्यस्य, रुक्मिणोऽपि च भूभृतः। हैरण्यवतवर्षस्य, गिरेः शिखरिणोऽपि च ॥ २७ ॥ क्षेत्रस्यैरवताख्यस्य, षट्खण्डस्य पुरीस्पृशः। वर्णनं च क्षेत्रशैलादीनां साम्यनिरूपणम् ॥ २८ ॥ सर्वाग्रमद्रिकूटानां, खेटश्रेणीपुरामपि। नदीकुण्डहृदादीनां, चक्रिरत्नार्हतामपि ॥ २९ ॥ चन्द्रसूर्यग्रहादीनां, सज्जम्बूद्वीपवर्त्तिनाम्। एकोनविंशे सर्गेऽत्र, सर्वमित्यादि वर्णितम् १९ ॥ ३० ॥ विस्तृता

५

१०

१४

पञ्चभिर्द्वारैः, सूर्येन्द्वोर्मण्डलादिभिः। चाररीतिर्भयोगश्च, दिनवृद्धिक्षयादि च ॥ ३१ ॥ ध्रुवराहोः पर्वराहो-स्तिथ्युत्पत्तेश्च शंसनम्। द्वारैश्च पञ्चदशभिर्नक्षत्राणां निरूपणम् ॥ ३२ ॥ इत्यादि विंशतितमे, सर्वं सर्गे निरूपितम् २०। एकविंशेऽत्र सर्गेऽथ, वर्णनं लवणोदधेः ॥ ३३ ॥ सशिखस्य सपातालकुम्भस्य द्वीपशालिनः। सुस्थितादिसुराढ्यस्य, चन्द्रार्कादिद्युतिस्पृशः २१ ॥३४॥ युग्मम्। धातकीखण्डकालोदवर्णनं पूर्ववत्ततः। द्वाविंशे वर्णितं सर्गे २२, पृथक्क्षेत्रादिकीर्त्तनैः ॥३५॥ तथैव पुष्करार्द्धस्य, मानुषोत्तरभूभृतः। ततोऽखिलनरक्षेत्रे, क्षेत्र-शैलादिसङ्ग्रहः ॥ ३६ ॥ ततः शाश्वतचैत्यानां, सर्वसङ्ख्यानिरूपणम्। त्रयोविंशेऽखिलं सर्गे, विविच्येत्यादि वर्णितम् २३ ॥३७॥ नृक्षेत्रात्परतश्चन्द्रसूर्यादिश्रेणिकीर्त्तनम्। पुष्कराब्धिक्षीरवरद्वीपाब्ध्यादिनिरूपणम् ॥३८॥ क्रमान्नन्दीश्वरद्वीपचैत्याद्याख्यानविस्तृतिः। इत्याद्युक्तं चतुर्विंशे, स्वयम्भूरमणावधिः २४ ॥३९॥ पञ्चविंशे, स्थिर-चन्द्रज्योतिश्चक्रव्यवस्थितिः २५। ऊर्ध्वलोकेऽथ सौधर्मेशानयोर्देवलोकयोः ॥ ४० ॥ विमानावलयः पुष्पावकी-र्णाश्च यथास्थिति। विमानमानप्रासादपरिपाट्यः सभा अपि ॥ ४१ ॥ उत्पद्यन्ते यथा देवा, अभिषिच्यन्त एव ते। पूजयन्ति यथा सिद्धान्, यथा भोगांश्च भुञ्जते ॥ ४२ ॥ यादृक्स्वरूपा भाषां च, यां भाषन्ते सुधा-भुजः। भवन्ति देव्यो यादृश्यः, सेवन्ते च रतं यथा ॥ ४३ ॥ आहारो यादृगेषामुच्छ्वासश्च यावदन्तरः। यथा मनुष्यलोकेऽमी, आयान्ति स्नेहयन्त्रिताः ॥ ४४ ॥ प्रेम्णा वशीकृता यान्ति, यावतीषु महीष्वधः। मध्ये महर्धिकं यान्ति, यथाऽवधिदृशो यथा ॥ ४५ ॥ लोकपालाग्रमहिषीसामानिकादिशालिनोः। शक्तिसम्पद्धि-

२०

२५

२८

वरणं, सौधर्मेशाननाथयोः ॥ ४६ ॥ षड्विंशतितमे सर्गे, इत्याद्यखिलमीरितम् २६ । सप्तविंशे ततः सर्गे, तृतीयतुर्यनाकयोः ॥ ४७ ॥ वर्णनं ब्रह्मलोकस्य, तमस्कायस्य मूलतः । कृष्णराजी तद्विमानलोकान्तिकसुधाभुजाम् ॥ ४८ ॥ स्वर्गस्य लान्तकस्याथ, सकिल्बिषिकनाकिनः । जमालेश्चरितं शुक्रसहस्रारादिवर्णनम् ॥ ४९ ॥ यावदच्युतनाकस्य, कीर्त्तनं रामसीतयोः । चरितं तदनु ग्रैवेयकानुत्तरवर्णनम् ॥ ५० ॥ ततः सिद्धशिलाख्यानं, लोकान्तस्य च संशनम् । इत्यादिवर्णनैरेवं, क्षेत्रलोकः समापितः २७ ॥ ५१ ॥ इति क्षेत्रलोकः ॥

दिष्टलोकेऽथ कालस्य, युक्तिव्यक्तिर्मतद्वये । ऋतूनां वर्णनं षण्णां, निक्षेपाः कालगोचराः ॥ ५२ ॥ समयावलिकाक्षुल्लभवादिपरिकीर्त्तनम् । घटीमुहूर्त्तदिवसपक्षमासादिशंसनम् ॥ ५३ ॥ सूर्यर्त्तुचन्द्रनक्षत्राभिवर्द्धिताह्वयाः क्रमात् । मासा वर्षाण्यथैतेषामुपपत्त्यादिवर्णनम् ॥ ५४ ॥ युगस्यादिर्युगे मासर्त्त्वयनानि दिनानि च । अधिमासावमरात्रावृत्तयो विषुवन्ति च ॥ ५५ ॥ करणान्यृत्वयनादेर्नक्षत्रानयनं विधोः । रवेश्च करणान्येषां, ववादिकरणान्यपि ॥ ५६ ॥ पौरुष्यादिपरीमाणं, तस्मात्तिथ्यादिनिश्चयः । सर्गेऽष्टाविंशतितमे, इत्यादि युगवर्णनम् २८ ॥५७॥ युगात्प्रभृत्यब्दशतसहस्रादिक्रमेण च । शीर्षप्रहेलिकान्ताङ्कस्वरूपप्रतिपादनम् ॥५८॥ अरत्रयस्याद्यस्यावसर्पिण्यां वर्णनं स्थितेः । कल्पद्रुयुग्मिलोकादेरेकोनत्रिंश आहतम् २९ ॥५९॥ अर्हतां पद्धतिः सर्वा, निर्वाणावधि जन्मतः । उक्ता त्रिंशत्तमे सर्गे ३०, एकत्रिंशे ततः पुनः ॥६०॥ चक्रिदिग्विजयः सम्पन्निधिरत्नादिरस्य च । सामान्यतः शार्ङ्गिसीरिप्रतिविष्ण्वादिकीर्त्तनम् ३१ ॥६१॥ सर्गे द्वात्रिंशत्तमेऽथ, सङ्क्षेपात्प्राग्भवा-

५

१०

१४

दितः। जिनानां वृषभादीनां, चरित्रस्य निरूपणम् ॥६२॥ एतस्यामवसर्पिण्यां, वर्णनं जातजन्मनाम् ३२। त्रयस्त्रिंशे चक्रिविष्णुबलदेवादिसन्नृणाम् ॥ ६३ ॥ अरस्य पञ्चमस्याथ, स्वरूपेण निरूपणम्। अरेऽस्मिन् पञ्चमे ये चोद्यास्तत्सूरयश्च ये ॥ ६४ ॥ तेषां नामानि सर्वाग्रमाचार्यादिमहात्मनाम्। ख्याता ततोऽरके षष्ठे, धर्मोच्छेदादिका स्थितिः ॥ ६५ ॥ गिरेः शत्रुञ्जयस्याथ, वृद्धिहान्यादिशंसनम्। बिलवासिजनावस्थोत्सर्पिण्यां च तथोत्क्रमात् ॥ ६६ ॥ षण्णामराणां पर्यायवृद्ध्याख्यानं यथाक्रमम्। एतदुत्सर्पिणीभाविजिनचक्र्यादिकीर्तनम् ॥ ६७ ॥ इत्यादिकं चतुस्त्रिंशे, सर्गे सर्वं निरूपितम् ३४। पञ्चत्रिंशेऽथ पुद्गलपरावर्त्तश्चतुर्विधः ॥६८॥ औदारिकादिका कार्मणान्ता या वर्गणाऽष्टधा। अनुभागस्पर्द्धकानि, कर्मणां परमाणुषु ॥ ६९ ॥ एषां स्वरूपं मानं चातीतानागतकालयोः। सम्पूर्णो दिष्टलोकोऽयमित्यादिपरिकीर्त्तने ३५ ॥ ७० ॥ इति दिष्टलोकः ॥

भावलोकेऽथ भावानां, षण्णां सम्यग्निरूपणम्। सर्गे षट्त्रिंश इत्येवं, भावलोकः समर्थितः ३६ ॥ ७१ ॥

॥ इति भावलोकः ॥

एभिर्विचारैर्मणिरत्नसारैः, पूर्णः सुवर्णोच्चदलङ्कृतिश्च। समौक्तिकश्रीर्विबुधाहृतोऽयं, ग्रन्थोऽस्तु सिद्ध्यै जिनराजकोशः ॥ ७२ ॥ (उपजातिः) अनाभोगो भूयान्न सदनुभवः शास्त्रविभवो, न सामग्री तादृग् न पटुघटना वाक्यरचना। श्रियं सत्यप्येवं यदयमभजद् ग्रन्थनृपतिः, कृती हेतुस्तत्रोल्लसति सुमनःकोविदकृपा ॥ ७३ ॥ (शिखरिणी) सन्तः शास्त्रसुधोर्मिधौतरुचयो ये पूर्णचन्द्राग्रजा, वन्द्यास्तेऽद्य मया कवित्वकुमुदोल्लासेऽनवद्यो-

२०

२५
॥५८१॥

२८

द्यमाः । येऽपि द्वेषसितित्विषोऽतिकठिनास्तान् वस्तुतः संस्तुतान्, मन्ये प्रस्तुतकाव्यकाञ्चनकषान् सम्यक्परीक्षाक्षमान् ॥ ७४ ॥ (शार्दूल०) विश्वाश्चर्यदकीर्त्तिकीर्तिविजयश्रीवाचकेन्द्रान्तिषद्राजश्रीतनयोऽतनिष्ट विनयः श्रीतेजपालात्मजः । काव्यं यत्किल तत्र निश्चितजगत्तत्त्वे श्रितः पूर्णतां, सप्तत्रिंश उदीतचिद्रविरुचिः सर्गो निसर्गोज्ज्वलः ॥ ७५ ॥

इति महोपाध्यायश्रीविनयविजयगणिविरचिते श्रीलोकप्रकाशे समस्त-ग्रन्थाख्यातसर्गानुक्रमसूचकः सप्तत्रिंशत्तमः सर्गः समाप्तः ॥

॥ अथ ग्रन्थकर्त्तुः प्रशस्तिः ॥

श्रेयः श्रीवर्द्धमानो दिशतु शतमखश्रेणिभिः स्तूयमानः, सत्क्ष्माभृत्सेव्यपादः कृतसदुपकृतिर्गोपतिर्नूतनो वः । कालेऽप्यस्मिन् प्रदोषे कटुकुमतिकुहूकल्पितध्वान्तपोषे, प्रादुष्कुर्वन्ति गावः प्रसृमरविभवा युक्तिमार्गं यदीयाः ॥ १ ॥ (स्रग्धरा) तत्पट्टेऽथेन्द्रभूतेरनुज उदभवच्छ्रीसुधर्मा गणीन्द्रो, जम्बूस्तत्पट्टदीपः प्रभव इति भवाम्भोधिनौस्तस्य पट्टे । सूरिः शय्यम्भवोऽभूत्स मनकजनकस्तत्पदाम्भोजभानुस्तत्पट्टैरावतेन्द्रो जनविदितयशाः श्रीयशोभद्रसूरिः ॥ २ ॥ (स्रग्धरा) तत्पट्टभारधुर्यौ गणधरवर्यौ श्रियं दधाते द्वौ । सम्भूतविजयसूरिः सूरिः श्रीभद्रबाहुश्च ॥ ३ ॥ (आर्या) श्रीस्थूलभद्र उदियाय तयोश्च पट्टे, जातौ महागिरिसुहस्तिगुरू ततश्च । पट्टे तयोः श्रियमुभौ दधतुर्गणीन्द्रौ, श्रीसुस्थितो जगति सुप्रतिबुद्धकश्च ॥ ४ ॥ (वसन्ततिलका) तत्पट्टभूषणमणिर्गुरुरिन्द्रदिन्नः, श्रीदिन्नसूरिरथ तस्य पदाधिकारी । पट्टे रराज गुरुसिंहगिरिस्तदीये, स्वामी च वज्रगुरुरस्य पदे बभूव ॥ ५ ॥ (वसन्त०) श्रीवज्रसेनसुगुरुर्बिभराम्बभूव, पट्टं तदीयमथ चन्द्रगुरुः पदेऽस्य । सामन्तभद्रगुरुरुन्नतिमस्य पट्टे, चक्रेऽस्य पट्टमभजद्वृद्धदेवसूरिः ॥ ६ ॥ प्रद्योतनस्तदनु तस्य पदे च मानदेवस्तदीयपदभृद्गुरुमानतुङ्गः । वीरस्ततोऽथ जयदेव इतश्च देवानन्दस्ततश्च भुवि विक्रमसूरिरासीत् ॥७॥ तस्माद्बभूव नरसिंह इति प्रतीतः, सूरिः समुद्र इति पट्टपतिस्तदीयः । सूरिः पदेऽस्य पुनरप्यजनिष्ट मानदेवस्ततश्च विबु-

१०

१५

॥५८२॥

१८

र्धप्रभसूरिरासीत् ॥ ८ ॥ जयानन्दः पट्टे श्रियमपुषदस्यास्य च रविप्रभस्तत्पट्टेशः समजनि यशोदेवमुनिराट् । ततः प्रद्युम्नाख्यो गुरुरुदयति स्माथ पुनरप्यभून्मानादेवो गुरुर्विमलचन्द्रश्च तदनु ॥ ९ ॥ (शिखरिणी) तस्मादुद्योतनाख्यो गुरुरभवदितः सर्वदेवो मुनीन्द्रस्तस्माच्छ्रीदेवसूरिस्तदनु पुनरभूत्सर्वदेवस्ततश्च । जज्ञाते सूरिराजौ प्रगुणगुणयशोभद्रसन्नेमिचन्द्रौ, विख्यातौ भूतलेऽस्मिन्नविरतमुदितौ नूतनौ पुष्पदन्तौ ॥ १० ॥ (स्रग्धरा) मुनिचन्द्रमुनिस्ततोऽद्भुतोऽथाजितदेवश्च तदन्तिषद्वरेण्यः । अपरः पुनरस्य शिष्यमुख्यो, भुवि वादी विदितश्च देवसूरिः ॥ ११ ॥ (औपच्छन्दः) अजितदेवगुरोरभवत्पदे, विजयसिंह इति प्रथितः क्षितौ । तदनु तस्य पदं दधतावुभावभवतां गणभारधुरन्धरौ ॥ १२ ॥ (द्रुतवि०) सोमप्रभस्तत्र गुरुः शतार्थी, सतां मणिः श्रीमणिरत्नसूरिः । पट्टे मणिः श्रीमणिरत्नसूरेर्जज्ञे जगच्चन्द्रगुरुर्गरीयान् ॥१३॥ (उपजातिः) तेषामुभावन्तिषदावभूतां, देवेन्द्रसूरिर्विजयाच्च चन्द्रः । देवेन्द्रसूरेरभवच्च विद्यानन्दस्तथा श्रीगुरुधर्मघोषः॥१४॥(इन्द्र०)श्रीधर्मघोषादजनिष्ट सोमप्रभोऽस्य शिष्याश्च युगप्रमेयाः । चतुर्दिगुत्पन्नजनावनाय, योधा इव प्राप्तविशुद्धबोधाः ॥१५॥ (उपजातिः) श्रीविमलप्रभसूरिः परमानन्दश्च पद्मतिलकश्च । सूरिवरोऽप्यथ सोमप्रभपट्टेशश्च सोमतिलकगुरुः ॥ १६ ॥ (आर्या) शिष्यास्त्रयस्तस्य च चन्द्रशेखरः, सूरिर्जयानन्द इतीह सूरिराट् । स्वपट्टसिंहासनभूमिवासवः, शिष्यस्तृतीयो गुरुदेवसुन्दरः ॥ १७॥ (उपजातिः) श्रीदेवसुन्दरगुरोरथ पञ्च शिष्याः, श्रीज्ञानसागरगुरुः कुलमण्डनश्च । चञ्चद्गुणश्च गुणरत्नगुरुर्महात्मा, श्रीसोमसुन्दरगुरुर्गुरुसाधुरत्नः ॥ १८ ॥ (वसन्त०) श्रीदेवसुन्दरमुनीश्वर-

पट्टनेतुः, श्रीसोमसुन्दरगुरोरपि पञ्च शिष्याः । तत्र स्वपट्टवियदङ्गणभानुमाली, मुख्योऽन्तिषद्गणधरो मुनिसु[५१]न्दराख्यः ॥ १९ ॥ (वसन्त०) अन्ये श्रीजयचन्द्रः सूरिः श्रीभुवनसुन्दराह्वश्च । श्रीजिनसुन्दरसूरिर्जिनकीर्त्तिश्चेति सूरीन्द्राः ॥ २० ॥ (आर्या) मुनिसुन्दरसूरिपट्टभानुर्गुरुरासीदथ रत्नशे[५२]खराख्यः । दधदस्य पदं बभूव ल[५३]क्ष्मीपदयुक् सागरसूरिरीश्वरार्च्यः ॥ २१ ॥ (औपच्छन्दः) सु[५४]मतिसाधुगुरुस्तदनु प्रभामुदवहद्दधदस्य पदं प्रभुः । पदमदीदिपदस्य च हेम[५५]युग्विमलसूरिरुदात्तगुणोदयः ॥ २२ ॥ (द्रुत०) पट्टे तस्य बभूवुरुग्रतपसो वैरङ्गिकाग्रेसरा, आन[५६]न्दाद्विमलाह्वया गणभृतो भव्योपकारोद्धुराः । ये नेत्रेभशरामृतद्युतिमिते (१५८२) वर्षे क्रियोद्धारतश्चक्रुः स्वां जिनशासनस्य शिखरे कीर्त्तिं पताकामिव ॥ २३ ॥ (शार्दूल०) प्रमादाभ्रच्छन्नं चरणतरणिं मन्दकिरणं, पुनश्चक्रे दीप्रं रुचिररुचिरव्दात्यय इव । सृजन् पद्मोल्लासं सुविशदपथश्चन्द्रमधुरो, दिदीपे निष्पङ्कः स इह गुरुरानन्दविमलः ॥ २४ ॥ (शिखरिणी) विजय[५७]दानगुरुस्तदनु द्युतिं, तपगणेऽधिकभाग्यनिधिर्दधौ । श्रुतमहोदधिरेधितसद्विधिर्विधुयशा जिनधर्मधुरन्धरः ॥ २५ ॥ (द्रुतवि०) अभूत्पट्टे तस्योल्लसितविजयो हीरवि[५८]जयो, गुरुर्गीर्वाणौघप्रथितमहिमाऽस्मिन्नपि युगे । प्रबुद्धो म्लेच्छेशोऽप्यकबरनृपो यस्य वचसा, दयादानोदारो व्यतनुत महीमार्हतमयीम् ॥ २६ ॥ (शिखरिणी) तदनु विजय[५९]सेनसूरिराजस्तपगणराज्यधुरं दधार धीरः । अकबरनृपतेः पुरो जयश्रीर्यमवरीदुरुवादिवृन्ददत्ता ॥ २७ ॥ (औपच्छन्दः) जयति विज[६०]यदेवः सूरिरेतस्य पट्टे, मुकुटमणिरिवोद्यत्कीर्त्तिकान्तिप्रतापः । प्रथितपृथुतपःश्रीः शुद्धधीरिन्द्रभूतेः, प्रतिनिधिरतिदक्षो जङ्गमः कल्पवृक्षः

ग्रन्थकृत्प्रशस्तिः

२०

२५

॥५८३॥

२८

॥ २८ ॥ (मालिनी) तेन श्रीगुरुणाऽऽहितो निजपदे दीपोपमोऽदीदिपत्, सूरिः श्रीविजयादिसिंहसुगुरुः प्राज्यैर्महोभिर्जगत् । भूमौ स प्रतिबोध्य भव्यनिवहान् स्वर्गेऽप्यथ स्वर्गिणः, प्राप्तो बोधयितुं गुरौ विजयिनि प्रेमाणमुत्सृज्य नः ॥ २९ ॥ (शार्दूल०) तदनु पट्टपतिर्विहितोऽधुना, विजयदेवतपागणभूभृता । गुणगणप्रगुणोऽनणुभाग्यभूर्विजयते गणभृद्विजयप्रभः ॥३०॥ (द्रुतविलम्बितम्) निर्ग्रन्थः श्रीसुधर्माभिधगणधरतः कोटिकः सुस्थितार्याच्चन्द्रः श्रीचन्द्रसूरेस्तदनु च वनवासीति सामन्तभद्रात् । सूरेः श्रीसर्वदेवाद्वृद्गण इति यः श्रीजगच्चन्द्रसूरेर्विश्वे ख्यातस्तपाख्यो जगति विजयतामेष गच्छो गरीयान् ॥ ३१ ॥ (स्रग्धरा) इतश्च—

श्रीहीरविजयसूरीश्वरशिष्यौ सोदरावभूतां द्वौ । श्रीसोमविजयवाचकवाचकवरकीर्त्तिविजयाख्यौ ॥ ३२ ॥ (आर्या) तत्र कीर्त्तिविजयस्य किं स्तुमः, सुप्रभावममृतद्युतेरिव । यत्करातिशयतोऽजनिष्ट मत्, प्रस्तरादपि सुधारसोऽसकौ ? ॥ ३३ ॥ (रथोद्धता) प्रतिक्रियां कां यदुपक्रियाणां, गरीयसीनामनुसर्त्तुमीशे । ज्ञानादिदानैरुपचर्य सोऽयं, यैः कल्पितः कीटकणोऽपि कुम्भी ॥ ३४ ॥ (उपजातिः) विनयविजयनामा वाचकस्तद्विनेयः, समदभदणुशक्तिर्ग्रन्थमेनं महार्थम् । तदिह किमपि यत्स्यात्क्षुण्णमुत्सूत्रकार्यं, मयि विहितकृपैस्तत्कोविदैः शोधनीयम् ॥ ३५ ॥ (मालिनी) सच्छाये सुमनोरमेऽतिफलदे काव्येऽत्र लीलावने, प्राज्ञेन्दिन्दिरमोदके सहृदयश्रेणीमरालाश्रिते । दोषः कण्टकिशाखिवद्यदि भवेन्मन्ये गुणत्वेन तं, येन व्यर्थमनोरथस्तदनुदग्नोष्ट्रः खलः खिद्यते ॥ ३६ ॥ (शार्दूल०) उत्तराध्ययनवृत्तिकारकैः, सुष्ठु भावविजया-

ख्यवाचकैः । सर्वशास्त्रनिपुणैर्यथागमं, ग्रन्थ एष समशोधि सोद्यमैः ॥ ३७ ॥ (रथोद्धता) जिनविजयाभिधगणयो, ग्रन्थेऽस्मिन्नकृषतोद्यमं सुतराम् । लिखितप्रथमादर्शाः शोधनलिखनादिपटुमतयः ॥ ३८ ॥ (आर्या) वसुखांश्वेन्दुप्रमिते (१७०८) वर्षे हर्षेण जीर्णदुर्गपुरे । राधोज्वलपञ्चम्यां, ग्रन्थः पूर्णोऽयमजनिष्ट ॥ ३९ ॥ (आर्या) एतद्ग्रन्थग्रथनप्रचितात्सुकृतान्निरन्तरं भूयात् । श्रीजिनधर्मप्राप्तिः श्रोतुः कर्त्तुश्च पठितुश्च ॥ ४० ॥ (आर्या) द्रव्यक्षेत्रादिभावा य इह निगदिताः शाश्वतास्तीर्थकृद्भिर्जीवा वा पुद्गला वा कलितनिजकलाः पर्यवापेक्षया ते । यावत्तिष्ठन्ति तावज्जगति विजयतां ग्रन्थकल्पद्रुमोऽयं, विद्वद्वृन्दारकार्च्यः प्रमुदितसुमनाः कल्पितेष्टार्थसिद्धिः ॥ ४१ ॥ (स्रग्धरा) ॥ ग्रन्थाग्रं श्लोकसङ्ख्या २०६२१ । इति महोपाध्यायश्रीविनयविजयविहितो लोकप्रकाशः समाप्तः ॥

इति महोपाध्यायश्रीविनयविजयगणिविरचिते श्रीलोकप्रकाशे
गुरुपरंपरावर्णनमयी प्रशस्तिः समाप्ता ॥

श्रीमद् ग्रन्थकारप्रशस्तिः

भगवान् महावीरः (श्लोक १)

१ श्रीसुधर्मा गणीन्द्रः (निर्ग्रन्थगच्छः)
२ श्रीजम्बूस्वामी.
३ श्रीप्रभवस्वामी.
४ श्रीशयम्भवसूरिः
(शय्यम्भवभट्टः)
५ श्रीयशोभद्रसूरिः [१] (श्लोक २)
६ श्रीसम्भूतविजयः श्रीभद्रबाहुः
(द्वौ पट्टधरौ) (श्लो० ३)
७ श्रीस्थूलभद्रः
८ श्रीमहागिरिः श्रीसुहस्तिः
(द्वौ पट्टधरौ)
९ श्रीसुस्थितः श्रीसुप्रतिबुद्धकः (कोटिकगणः)
(द्वौ पट्टधरौ) (श्लो० ४)
१० श्रीइन्द्रदिन्नः
११ श्रीदिन्नसूरिः
१२ श्रीसिंहगिरिः
१३ श्रीवज्रस्वामी. (श्लोक ५)
१४ श्रीवज्रसेनः
१५ श्रीचन्द्रगुरुः (चन्द्रगच्छ)
१६ श्रीसामन्तभद्रः (वनवासिगणः)
१७ श्रीदेवसूरिः [१] (श्लो० ६)
१८ श्रीप्रद्योतनसूरिः
१९ श्रीमानदेवसूरिः [१]

२० श्रीमानतुङ्गसूरिः
२१ श्रीवीरसूरिः
२२ श्रीजयदेवसूरिः
२३ श्रीदेवानन्दसूरिः
२४ श्रीविक्रमसूरिः (श्लो० ७)
२५ श्रीनरसिंहः
२६ श्रीसमुद्रसूरिः
२७ श्रीमानदेवसूरिः [२]
२८ श्रीविबुधप्रभसूरिः (श्लो० ८)
२९ श्रीजयानन्दसूरिः
३० श्रीरविप्रभसूरिः
३१ श्रीयशोदेवमुनिराट्‌
३२ श्रीप्रद्युम्नगुरुः
३३ श्रीमानदेवः [३]

३४ श्रीविमलचन्द्रः (श्लो० ९)
३५ श्रीउद्योतनगुरुः
३६ श्रीसर्वदेवमुनीन्द्रः (वटगणः) [१]
३७ श्रीदेवसूरिः [२]
३८ सर्वदेवसूरिः [२]
३९ श्रीयशोभद्रसूरिः [२] श्रीनेमिचन्द्रसूरिः
(द्वौ पट्टधरौ) (श्लो० १०)
४० श्रीमुनिचन्द्रसूरिः
४१ श्रीअजितदेवः वादी—श्रीदेवसूरिः [३]
(द्वौ पट्टधरौ) (श्लो० ११)
४२ श्रीविजयसिंहसूरिः (श्लो० १२)
४३ श्रीसोमप्रभःशतार्थी श्रीमणिरत्नसूरिः
(द्वौ पट्टधरौ)
४४ श्रीजगचन्द्रसूरीशः (तपगच्छः) (श्लो० १३)

४५ श्रीदेवेन्द्रसूरिः श्रीविजयचन्द्रसूरिः
(द्वौ पट्टधरौ)

४६ श्रीविद्यानन्दसूरिः श्रीधर्मघोषसूरिः
(द्वौ पट्टधरौ) (श्लो० १४)

४७ श्रीसोमप्रभसूरिः (श्लो० १५)

४८ श्रीविमलप्रभः श्रीपरमानन्दः श्रीपद्मतिलकः श्रीसोमतिलकः
(चत्वारः पट्टधराः) (श्लो० १६)

४९ श्रीचन्द्रशेखरसूरिः श्रीजयानन्दः पट्टधरः—श्रीदेवसुन्दरसूरिः
(श्लो० १७) (शिष्याः ५)

५० श्रीज्ञानसागरसूरिः श्रीकुलमण्डनसूरिः श्रीगुणरत्नसूरिः
पट्टधरः—सोमसुन्दरः (शिष्याः५) श्रीसाधुरत्नसूरिः (श्लो०१८)

५१ पट्टधरः—श्रीमुनिसुन्दरसूरिः श्रीजयचन्द्रसूरिः श्रीभुवनसुन्दरसूरिः
श्रीजिनसुन्दरसूरिः श्रीजिनकीर्तिसूरिः (श्लो० १९–२०)

५२ श्रीरत्नशेखरसूरिः ;

५३ श्रीलक्ष्मीसागरसूरिः (श्लो० २१)

५४ श्रीसुमतिसाधुसूरिः

५५ श्रीहेमविमलसूरिः (श्लो० २२)

५६ श्रीआनन्दविमलसूरिः
(क्रियोद्धारकः) (श्लो० २३–२४) सं० १५८२

५७ श्रीविजयदानसूरिः (श्लो० २५)

*५८ श्रीहीरविजयसूरीशः
(अकबरप्रतिबोधकः) (श्लो० २६)

५९ श्रीविजयसेनसूरिः (श्लो० २७)

६० श्रीविजयदेवसूरिः (श्लो० २८)
(देवसूरीयशाखा)

६१ श्रीविजयसिंहसूरिः (श्लो० २९)

६२ श्रीविजयप्रभसूरिः (श्लो० ३०)

*५८ श्रीहीरविजयसूरीश.
शिष्य

श्रीसोमविजय—
उपाध्यायः
(श्लो० ३२)

५९ श्रीकीर्त्तिविजय—
उपाध्यायः
(श्लो० ३२)

६० श्रीविनयविजयो—
पाध्यायः
(ग्रन्थकारः) (श्लो० ३५)
सं. १७०८

इति श्रीमहोपाध्यायश्रीविनयविजयगणिविरचिते श्रीलोकप्रकाशे ग्रन्थकारप्रशस्तिः समाप्ता ॥

इति श्रेष्ठी-देवचन्द्र लालभाइ-जैनपुस्तकोद्धारे ग्रन्थाङ्कः ८६.

श्रेष्ठी देवचंद लालभाइ जैनपुस्तकोद्धारफंडद्वारा मुद्रिताः

लभ्यग्रन्थाः—

ग्रन्थाङ्कः	ग्रन्थनामानि	मूल्यम्
४२	आनंदकाव्यमहोदधिः (षष्ठं मौक्तिकम्)	०-१०-०
६२	सुबोधासामाचारी	०–८–०
६४	प्रवचनसारोद्धारः (सटीक उत्तरार्द्धः)	४–०–०
६६	आनंदकाव्यमहोदधिः (सप्तमं मौक्तिकम्)	१–८–०
६७	तत्त्वार्थाधिगमसूत्रम् (भाष्यटीकायुतंपूर्वार्द्धम्)	६–०–०
६८	नवपदप्रकरणम् (लघुवृत्तिसहितम्)	१–०–०
६९	पंचवस्तुकग्रन्थः (स्वोपज्ञटीकाऽन्वितः)	३–०–०
७०	आनंदकाव्यमहोदधिः (अष्टमं मौक्तिकम्)	१–८–०
७१	आचारप्रदीपः	१–८–०
७२	विचाररत्नाकरः	३–०–०
७३	नवपदप्रकरणम् (बृहद्वृत्तिसहितम्)	४–०–०
७४	लोकप्रकाशः (द्वितीयो विभागः)	२–८–०
७५	महावीरचरित्रम् (गुणचन्द्रगणिकृतं प्राकृतम्)	४–०–०
७६	तत्त्वार्थाधिगमसूत्रम् (भाष्यटीकायुतं उत्तरार्द्धम्)	६–०–०
७७	लोकप्रकाशः (तृतीयो विभागः)	२–०–०
७८	भरतेश्वरबाहुबलिवृत्तिः (प्रथमो विभागः)	२–०–०
७९	भक्तामर-कल्याणमन्दिर— नमिऊणस्तोत्रत्रयं सटीकम्	५–०–०
८०	प्रियङ्करनृपकथा	१–८–०

ग्रन्थाङ्कः	ग्रन्थनामानि	मूल्यम्
८१	अनेकार्थरत्नमञ्जूषा (अष्टलक्षार्थी)	३—०—०
८२	कल्पसूत्रम् (बारसासूत्रम्) सचित्रम्	१२-०-०
८३	ऋषभपञ्चाशिका (टीकाभाषान्तरयुता)	४—०—०
८४	जैनधर्मवरस्तोत्रम् (टीकाभाषान्तरयुतम्)	३—०—०

ग्रन्थाङ्कः	ग्रन्थनामानि	मूल्यम्
	मुद्र्यमाणाः ग्रन्थाः	
८५	आवश्यकसूत्रम् (मलयगिरीयटीकायुतं तृतीयो विभागः, सम्पूर्णः)	
८६	लोकप्रकाशः (चतुर्थ विभागः सम्पूर्णः) अयं ग्रन्थः	

श्रीमतीआगमोदयसमितिद्वारा मुद्रिताः

लभ्यग्रन्थाः—

ग्रन्थाङ्कः	ग्रन्थनामानि	मूल्यम्
३४	विशेषावश्यकभाष्यगाथा-विषयानुक्रमः	०—५—०
३६	गच्छाचारप्रकीर्णकम् (सटीकम्)	०—६—०
३७	धर्मबिन्दुप्रकरणम् (सटीकम्)	०-१२-०
४५	भक्तामरस्तोत्रपादपूर्तिकाव्यसङ्ग्रहः (टीकाभाषान्तरयुतः प्रथमो विभागः)	३—०—०

ग्रन्थाङ्कः	ग्रन्थनामानि	मूल्यम्
४६	प्रकीर्णकदशकम् (संस्कृतच्छायाऽन्वितम्)	२—०—०
४७	पञ्चसङ्ग्रहः (स्वोपज्ञटीकायुतः)	२—८—०
४८	विशेषावश्यकभाष्यम् (मूलस्य टीकायाश्च गुर्जरानुवादयुतम्, द्वितीयो विभागः	३—०—०
५०	जीवसमासः (सटीकः)	१—८—०

ग्रन्थाङ्कः	ग्रन्थनामानि	मूल्यम्
५१	स्तुतिचतुर्विंशतिका (शोभनमुनिकृता सचित्रा, सटीका च)	८—०—०
५२	स्तुतिचतुर्विंशतिका (शोभनमुनिकृता सचित्रा, टीकाभाषान्तरयुता च)	६—०—०
५३	चतुर्विंशतिका (वप्पभट्टिसूरिकृता, सचित्रा, टीका-भाषान्तरयुता)	६—०—०
५४	भक्तामरस्तोत्रपादपूर्तिकाव्यसङ्ग्रहः (टीका-भाषान्तरयुतो द्वितीयो विभागः)	३—८—०
५५	नन्द्यादिसप्तसूत्रगाथाविषयानुक्रमः	२—०—०
५६	आवश्यकसूत्रम् (मलयगिरीयटीकायुतं, प्रथमोविभागः)	४—०—०
५७	लोकप्रकाशः (गुर्जरानुवादयुतः प्रथमो विभागः)	३—८—०
५९	चतुर्विंशतिजिनानन्दस्तुतिः (पं. मेरुविजयकृता, सचित्रा,टीकाभाषान्तरयुता)	६—०—०
६०	आवश्यकसूत्रम् (मलयगिरीयटीकायुतं, द्वितीयो विभागः)	२—८—०
६१	लोकप्रकाशः (गुर्जरानुवादयुतो द्वितीयो विभागः)	३—८—०

प्राप्तिस्थानम्—

शेठ देवचंद लालभाई जैन धर्मशाला, वडेखान् चकला, गोपीपुरा, सुरत.

श्रीजैनआनंदपुस्तकालये,

लभ्यग्रन्थाः—

१ अहिंसाष्टकं, सर्वज्ञसिद्धिः ऐन्द्रस्तुतिश्च	०–८–०
२ अनुयोगद्वार–चूर्णिःहारिभद्रीयवृत्तिश्च	१–१२–०
३ उत्तराध्ययन–चूर्णिः	३–८–०
४ ऋषिभाषितानि	०–२–०
५ ज्योतिष्करंडकप्रकीर्णकम् (सटीकम्)	३–०–०
६ जिनस्तुति-देशना (हिन्दी)	०–६–०
७ तत्त्वतरंगिणी	०–८–०
८ त्रिषष्टीयदेशनासंग्रहः	०–८–०
९ दशवैकालिक-चूर्णिः	४–०–०
१० प्रकीर्णकदशकम् (संस्कृतछायान्वितम्)	१–८–०
११ द्रव्यलोकप्रकाशः	९–०–०
१२ नंदीआदिअकारादिक्रमो विषयक्रमश्च	१–८–०
१३ नंदीचूर्णिहारिभद्रीयवृत्तीः	१–४–०
१४ नवपद-प्रकरण-बृहद्वृत्तिः	३–०–०
१५ परिणाममाला (लेजर पेपर)	०-१२-०
,, ,, (ड्राइंग पेपर)	०-१०-०
१६ प्रवचन-सारोद्धारः (पूर्वार्धम्)	३–०–०
१७ ,, ,, (उत्तरार्धम्)	३–०–०
१८ पंचाशकादिशास्त्राष्टकम् मूलमात्रम्	३–०–०
१९ पंचाशकादिशास्त्रदशकस्याकाराद्यनुक्रमः	३–०–०
२० पंचवस्तुकग्रन्थः (सटीकः)	२–४–०
२१ पयरणसंदोहो	०-१२-०
२२ प्रव्रज्या-विधान-कुलकादि	०–३–०
२३ प्रत्याख्यानादि-विशेषणवती-वीशवीशी	१–४–०
२४ बारसासूत्रं (सचित्रं)	१२-०-०
२५ मध्यमसिद्धप्रभा व्याकरणम्	०–८–०
२६ यशोविजयजीकृत १२५, १५०,३५०, गाथायाः स्तवनानि(साक्षिपाठ सहितानि)	०–८–०
२७ युक्ति-प्रबोधः	१–८–०
२८ ललितविस्तरा (सटीप्पन)	०-१०-०
२९ वस्त्रवर्णसिद्धिः	०–४–०
३० विचार-रत्नाकरः	२–४–०
३१ विशेषावश्यक-विषयानुक्रमः अकारादिक्रमः	०–३–०
३२ वंदारुवृत्तिः	१–४–०
३३ श्राद्धविधिः (हिन्दी)	१–८–०
३४ क्षेत्रलोक-प्रकाशः	२–०–०

मुद्र्यमाणाः ग्रन्थाः

बृहत्सिद्धप्रभाव्याकरणम्
आचारांगसूत्रवृत्तिः
भगवतीसूत्रं दानशेखरसूरिकृतवृत्तिसहितम्
पुष्पमाला अपरनाम उपदेशमालाप्रकरणवृत्तिः
तत्त्वार्थसूत्रम् (हारिभद्रीयटीकासहितम्)

श्री–जैन–आनंद–पुस्तकालय, ओशवाल महोल्ला, गोपीपुरा, सुरत.

सूर्यपुरे श्रीजिनदत्तसूरि-ज्ञानभाण्डागारे लभ्यग्रन्थाः—

पंचलिंगी प्रकरणम् (सटीक)	२-८-०	पौषधषट्त्रिंशिका (जयसोमीया, स०)	१-०-०	पंचप्रतिक्रमणादिसूत्र (मूलमात्र, शास्त्री)	०-१०-०
संदेहदोहावली (बृहद्वृत्तियुता)	२-०-०	श्रीपालचरित्रम् (सं० श्लोकबद्धम्)	भेट	राइदेवसिप्रतिक्रमणसूत्र (मूल, शास्त्री)	०-४-०
जयतिहुअणस्तोत्रम् (सटीकं)	०-४-०	,, ,, (प्रा० हिन्दी अनुवादयुतं)	२-०-०	धर्म० उत्सूत्रखण्डनम् (सटीकं)	१-०-०
संवेगरंगशाला (सं० छाँयाऽन्विता)	२-८-०	चैत्यवन्दनकुलकम् (सटीकम्)	२-४-०	श्रीजिनदत्तसूरिचरित्र (पूर्वार्द्ध)	१-८-०
प्राकृतदीपालिकाकल्पम्	०-८-०	साधुपंचप्रतिक्रमणसूत्र (हिन्दीशब्दार्थयुक्त)		श्रीजिनदत्तसूरिचरित्र (उत्तरार्द्ध)	१-८-०
भक्तामरस्तोत्रम् (सटीकम्)	०-८-०		१-०-०	बृहत्स्तवनावली	१-८-०
ईर्यापथिकीषट्त्रिंशिका(जयसोमीया,सटीका)	१-०-०	श्रावकपंचप्रतिक्रमणसूत्र (,, ,, ,,)	१-०-०	प्राकृतव्याकरणम्	१-०-०

प्राप्तिस्थानम्—श्रीजिनदत्तसूरि-ज्ञानभंडार, ठि० शीतलवाडी-उपाश्रय, ओशवाल महोल्ला, गोपीपुरा, सुरत.

मोहमय्यां श्रीजिनदत्तसूरि-ज्ञानभाण्डागारे लभ्यग्रन्थाः—

द्वादशकुलकम् (सटीकं)	१-०-०	श्रीपालचरित्रम् (संस्कृतं श्लोकबद्धम्)	भेट	पंचप्रतिक्रमणादिसूत्र (मूलमात्र, शास्त्री)	०-१०-०
षट्स्थानप्रकरणम् (सटीकं)	०-८-०	,, ,, (प्रा० हिन्दी अनुवादयुतं)	२-०-०	,, ,, (,, गुजराती)	०-१०-०
भक्तामरस्तोत्रम् (सटीकं)	०-८-०	साधुपंचप्रतिक्रमणसूत्र (हिन्दीशब्दार्थयुक्त)	१-०-०	राइदेवसिप्रतिक्रमणसूत्र (मूल, शास्त्री)	०-४-०
कल्याणमन्दिरस्तोत्रम् (सटीकं)	०-८-०	श्रावकपंचप्रतिक्रमणसूत्र (,, ,,)	१-०-०	दादासाहेबकी पूजा (शास्त्री)	०-२-०

प्राप्तिस्थानम्—श्रीजिनदत्तसूरि-ज्ञानभंडार, ठि० महावीरस्वामि-जैन-मंदिर, पायधुनी, मुंबई ३.

इति श्रीमहोपाध्यायकीर्तिविजयशिष्य-महोपाध्यायश्रीमद्विनयविजयगणिविरचिते
लोकप्रकाशे-काललोक-भावलोकप्रकाशे सप्तत्रिंशत्तमः सर्गः ॥
प्रशस्तिसमेतः समाप्तोयं ग्रन्थः ।

इति श्रेष्ठि-देवचन्द्र लालभाई-जैनपुस्तकोद्धारे-ग्रन्थाङ्कः ८६.

॥ ૐ ॥

અમદાવાદ-ઝાપડાની પોળ-નિવાસી

શેઠ મોહનલાલ છોટાલાલ તરફથી

તેમના ધર્મપત્ની

માણેકબાઇએ

નવપદજીની ઓળી

જ્ઞાન પંચમી, મૌન એકાદશી, વીશ-સ્થાનક અને રોહિણીના તપ કરેલા

卐 તે નિમિત્તે કરેલા ઉજમણામાં 卐

જ્ઞાનભક્તિ નિમિત્તે આ પુસ્તક સ્થાપન કરવામાં આવેલ છે વિક્રમ સં. ૧૯૮૫